No. १४१६

Title चिन्तामणि टीकायां अनुमान रहस्ये अवयवग्रन्थ रहस्यं

Author x

Extent ३० Age x

Subject न्याय शास्त्रं

प. ३

चिंतामणिटीकायां अनुमानखण्डे अवयव

ग्रंथसंख्या २

१५१६

अनुमानरहस्य

८५०

श्रीगणेशाय नमः केवलान्वय्यादिहेतुकानुमाननिरूपणानंतरं न्यायादिनिरूपणेऽसंगतत्वशंकानिरसार्थं
संगतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानीते। तच्चेत्यादि। तत्पूर्वं निरूपितमनुमानम्। केवलान्वय्यादिहेतुका
१ नुमानम्। परार्थम्। परविवादविषयार्थसाधकम्। न्यायसाध्यं। न्यायप्रयोज्यम्। इतीत्थमनंतरं प्रयोजकत्वसंग
त्येति पूरणीयम्। तथा च पूर्वनिरूपितपरार्थानुमानं न्यायादिसाध्यमिति प्रयोजकत्वसंगत्या न्यायादयो निरू
प्यंत इति निरूप्यंत इत्यस्यार्थः। तत्र। न्यायतदवयवादिषु मध्ये। समस्तरूपोपपन्नेत्यादि समस्तरूपोपपन्नं अ
सत्प्रतिपक्षितत्वाबाधितत्वपक्षसत्त्वसपक्षसत्त्वविपक्षावृत्तित्वात्मकपंचविशेषणविशिष्टं तथा च तथावि
धपंचविशेषणविशिष्टलिंगज्ञानजनकं वाक्यं न्याय इत्यर्थः। तत्रैव वाक्य इति। निरुक्तपंचविशेषणविशिष्टो
हेतुरिति वाक्य इत्यर्थः। किं त्वित्यादि। अनुमितिचरमकारणलिंगपरामर्शः। असत्प्रतिपक्षितत्वादिरूपपंच
विशेषणविशिष्टहेतुज्ञानं तत्प्रयोजकीभूतं यच्छाब्दज्ञानं तज्जनकवाक्यत्वं न्यायत्वमित्यर्थः। अत्र प्रतिज्ञा एम०
दिवाक्यपंचकजन्यबोधमादाय प्रतिज्ञादिपंचवाक्यरूपन्यायलक्षणं संगमयति। प्रतिज्ञादीति। एकवाक्यतया १

महावाक्यर्थज्ञानम–२

विशिष्टविषयकैकान्वयबोधतात्पर्यकतयास्वार्थविशिष्टज्ञानं प्रतिज्ञादिवाक्यपंचकस्य यः एकविशिष्टार्थस्तद्वि
षयकं ज्ञानम्। तेनेति। तादृशविशिष्टार्थविषयकज्ञानेनेत्यर्थः। विशिष्टवैशिष्ट्यावगाहिमानांतरमिति। पक्ष
वृत्तित्वादिविशेषणज्ञानात्मकस्वस्वरूपकारणांतरमित्यर्थः। उत्थाप्यते। संपद्यते। तेन चेति। तथाविधकारणे
न चेत्यर्थः। चरमपरामर्श इति। असत्प्रतिपक्षितत्वादिविशेषणविशिष्टलिंगज्ञानमित्यर्थः। तथा चानया प्रणा
न्या ड्या तथाविधपरामर्शप्रयोजकशाब्दज्ञानजनकत्वसत्त्वात् लक्ष्ये लक्षणसमन्वय इति भावः। ननु प्रतिज्ञाहेत्वोरयं
पदानुषंगपक्षे उपनयनिगमनयोश्च परस्परमर्थान्वितविशिष्टैकार्थविषयकशाब्दबोधजनकत्वसंभवेपि प्रति
ज्ञाहेत्ववयवादेर्नेतरावयवार्थेन सहान्वयबोधजनकत्वं तात्पर्याभावात्। अन्यथा प्रतिज्ञानिगमनादेरपि एक
वाक्यतया एकान्वयबुद्धिजनकत्वापत्तेः। तात्पर्यकल्पनाया अपि विशिष्टत्वात्॥ तथा च प्रतिज्ञादिवाक्यपंचक
जन्य एकान्वयबोध एवासिद्धः कथं तमादाय लक्षणसमन्वय इति चेदत्र मणिकारमतानुयायिनः। प्रतिज्ञाहे
त्वोरुदाहरणेन सहान्वयबोधजनकत्वे किं बाधकं न च तात्पर्याभावः। तस्यासार्वज्ञापरिछेद्यत्वेन तथा वक्तुमश

चिं·म·अ·
२
2

क्यत्वात्। न च तथा सति निगमनेन सहैकवाक्यतया प्रतिज्ञादेरन्वयबोधजनकत्वप्रसंगस्तात्पर्यकल्पनायाश्च
विशिष्टत्वादिति वाच्यम्। तयोरेकान्वयबोधजनने तात्पर्याभावेपि तात्पर्यभ्रमेण तथाविधान्वयबोधापत्तेर्भ
वतामपि दुरुद्धरत्वात्। यदि च तत्र तात्पर्यभ्रमानभ्युपगमेन तथापत्तिर्वार्यते तदा मन्मतेपि निगमनादौ प्रति
ज्ञाया व्यवहितोत्तरत्वादिरूपानुपूर्वीभ्रमानभ्युपगमेन तथापत्तेर्वारयितुं शक्यत्वात्। तथा च प्रतिज्ञाव्यवहि
तोत्तरहेत्ववयवाव्यवहितोत्तरोदाहरणाव्यवहितोत्तरोपनयाव्यवहितोत्तरत्वरूपानुपूर्वीविषयकनिगम
नविशेष्यकज्ञानात्तथाविधविशिष्टार्थविषयकान्वयबोधतात्पर्यज्ञानसहकृतात्तथाविधविशिष्टार्थविषय
केकान्वयबोधोत्पत्तौ बाधकाभावेनोक्तानुपपत्तेरभावात्। अथोदाहरणघटकीभूतप्रथमपदेन महानसमुपस्था
प्यते तथाविधद्वितीयपदेन महानसभिन्नमुपस्थाप्यते। तथा चोदाहरणवाक्याद्धूमवन्महानसं वह्निमद्धूमवन्म
हानसभिन्नवह्निमदित्यन्वयबोधः। एवं चोदाहरणार्थानामेव परस्परविशिष्टान्वयबोधो दुर्लभः। सुतरामितराव णम०
यवार्थेन सह तदर्थानां तथेति चेन्न। उदाहरणघटकीभूतयत्पदद्वयस्य दृष्टान्तवाक्यस्य च वह्निपदनिष्ठधूमव्या २

पकवह्निबोधतात्पर्यकत्वग्राहकत्वेनतदर्थानामुदाहरणार्थघटकतयोदाहरणवाक्यार्थधूमव्यापकवह्निसंबं
धिधूमवदितरावयवार्थेनसहान्वयेबाधकाभावेनानुपपत्त्यभावात्। नचतथापिप्रत्येकावयवजन्यावांतरशाब्द
बोधस्यापितथाविधविशेषणज्ञानात्मकमहावाक्यार्थविषयकबोधजनकत्वेनानुमितिचरमकारणप्रयोजकतया
तमादायप्रत्येकवाक्येतिव्याप्तिरितिवाच्यम्। धूमज्ञानज्ञाप्यवह्निसंबंधिपर्वताभिन्नधूमव्यापकवह्निसंबंधिधूमव
दभिन्नवह्निव्याप्यधूमवदभिन्नपर्वतविशेष्यकवह्निव्याप्यधूमज्ञानज्ञाप्यवह्निसंबंध्यभेदविषयकशाब्दबुद्धित्वा
वच्छिन्नकार्यतानिरूपितकारणतावच्छेदकीभूतानुपूर्वीघटकप्रतिज्ञादिवाक्यपंचकवृत्तिपंचतत्सं=ख्यापर्या पंचत्वसंख्या=
प्तत्वाश्रयस्यतथाविधजनकवाक्यांतेनविवक्षितत्वात्। तथाविधानुपूर्वीघटकत्वविशेषणोपादानान्नव्युत्क्रमो
च्चरितप्रतिज्ञादिवाक्यपंचकेऽतिव्याप्तिः। साध्यसाधनभेदेनविभिन्नन्यायोपलक्षणानांमपिविभिन्नतयानाव्याप्ति लक्षणाना+३
ःशंकावकाशइतिपरमरहस्यम्॰ न्यायावयवलक्षणमाह। अनुमितीत्यादि। अत्रशाब्दज्ञानजनकवाक्यत्वमात्र
मुदासीनवाक्येऽतिव्याप्तमतस्तथाविधप्रयोजकशाब्दज्ञानकांतंन्यायांतर्गतार्थकं। तथाचन्यायांतर्गतत्वेसति
भावल्युडं तेनभिन्नानिन्यायरूपाणिलक्ष्याणियेषांतेषामित्यर्थः ३

चि·म·
२
3

शाब्दज्ञानजनकवाक्यत्वं न्यायावयवत्वमिति न्यायावयवलक्षणवाक्यार्थः। न चैवं सति प्रतिज्ञाद्येकदेशे वह्निमद्वा
क्यादावतिव्याप्तिरिति वाच्यम्। प्रतिज्ञादिजन्यतत्तदर्थविषयकसमूहालंबनात्मकशाब्दज्ञाननिष्ठप्रतिज्ञादि
जन्यतावच्छेदकधर्मावच्छिन्नपंचजन्यतान्यतमजन्यतानिरूपितकारणतावच्छेदकतापर्याप्त्यधिकरणानु
पूर्वीकत्वस्य शाब्दबोधजनकत्वेन विवक्षणाद्वह्निमत्पर्वतादिनिष्ठानुपूर्व्यास्तु तथाविधपर्याप्त्यधिकरणत्वाभावान्न
तत्राव्याप्तिरिति। न च सदाशिवः प्रज्ञो देवत्वादित्यादिप्रतिज्ञाघटकीभूतशिवः प्रज्ञ इति भागेऽतिव्याप्तिः। तस्यापि
प्रकृतप्रतिज्ञाजन्यतावच्छेदकधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकतापर्याप्त्यधिकरणानुपूर्वी
कत्वादिति वाच्यम्। स्वघटितवाक्यप्रतिपन्नस्वार्थकत्वे सति तथाविधानुपूर्वीकत्वं तत्त्वमिति लक्षणकरणात्। प
रामर्शजनकं वाक्यं न्यायः। परामर्शप्रयोजकं तथाविधैकवाक्यघटकीभूतं वाक्यं न्यायावयव इति प्राचीनकृतन्या
यतदवयवलक्षणोपेक्षाबीजमाह। अत एवेति। प्राचीनकृतन्यायतदवयवलक्षणोपेक्षात एवेत्यर्थः। वह्निव्या एम·
प्यधूमवानयमिति वाक्य इति। तथाविधधूमवान्पर्वत इत्याकारकबोधजनके तथा चायमिति वाक्ये इत्यर्थः। तदव २

परामर्शजनकज्ञानजनकमित्यर्थान्नाग्निमद्भूत्वासंगतिः २

पव इति। तद्वाक्यघटकीभूततत्तत्पदे इत्यर्थः। न्यायतदवयवलक्षणेतियथासंख्येनान्वयः। नन्वत्रातिव्याप्तिरसंग
तेव नामार्थयोर्भेदान्वयस्याव्युत्पन्नतया तथाविधवाक्येन वह्निव्याप्तिविशिष्टधूमसंबंधाभिन्नः पर्वत इति बोध
जननेन व्याप्तिविशिष्टहेतुविशिष्टपक्षावगाहिपरामर्शजननादित्यत आह। तेनेति। तादृशवाक्येनेत्यर्थः। तद
वयवेन वेति। तादृशवाक्यघटकीभूततत्तत्पदेन चेत्यर्थः। परामर्शजनकस्येति। विशेषणज्ञानादिविधया परा
मर्शजनकस्येत्यर्थः। जननादिति। जननमेवाधकाभावादित्यर्थः। अयंभावः। भूतले न घटश्चंद्र इव मुखमित्यादौ
नञर्थे अभावे प्रतियोगितासंबंधेन घटस्य इवपदार्थसादृश्यैकदेशे चंद्रस्यान्वयानुभवात्। अव्ययनिपातातिरिक्त
रिक्तनामार्थयोरेव भेदान्वयस्याव्युत्पन्नतया प्रकृतस्थले अभयपतया पदार्थस्य व्याप्तिविशिष्टधूमस्य पर्वतत्व
विशिष्टे संबंधेन भाने बाधकाभाव इति। तथाविधज्ञानस्य पर्वतत्वधर्मितावच्छेदकवह्निविधेयकानुमितिजनक
त्वान्न परामर्शत्वव्याघात इति ध्येयम्। न्यायावयवस्यापि न्यायत्वमंगीकुर्वतां मतमाह। यत्त्विति। संक्षेप इति। ला
घवादित्यर्थः। परामर्शप्रयोजकत्वस्य न्यायपदशक्यतावच्छेदकत्वे इति शेषः। नन्वेवं सति पूर्वोक्तोपनयेऽतिव्या

चि॰म॰
४

प्तिरित्यत आह। परामर्शेत्यादि। विशेषाभावादिति प्रतिज्ञादिवाक्यपंचकापेक्षया विशेषाभावादित्यर्थः। सोपीति।
तथाचायमिति शब्दोपीत्यर्थः। तथा च तस्यापि लक्षणत्वान्न तत्रातिव्याप्तिरिति भावः। कथायामिति। जल्पविचारे
इत्यर्थः। आकांक्षाक्रमेणेति। जिज्ञासाक्रमेणेत्यर्थः। अभिधानमिति। न्यायप्रयोग इत्यर्थः। प्रथमं विशिष्टवै
शिष्ट्य इत्यादि। वह्निव्याप्तिविशिष्टधूमादिवैशिष्ट्यबोधे जिज्ञासा नास्तीत्यर्थः। तदभिधान इति। प्रथममित्यस्या
नुषंगः। तथा प्रथमम्। तथा चायमिति वाक्यप्रयोगे कृते इत्यर्थः। निग्रहादिति। अर्थान्तरनामनिग्रहस्थानप्रसं
गादित्यर्थः। तथा च न्यायस्य प्रथमतो वादिवक्तव्यत्वनियमान्नापत्वाकांतस्य प्रथमतो निराकांक्षितस्यापि तथा
चायमिति वाक्यस्य प्रथमतोऽभिधानमावश्यकमित्यर्थांतरप्रसंग इति भावः। ननु नियमानाम्नातस्थले अजि
ज्ञासितताभिधानमर्थांतरम्। प्रकृतस्थले तूपदर्शितनियमसत्त्वान्न प्रथमं तदभिधाने अर्थांतरप्रसंग इत्य
त आह। अन्यथेति। नियमसत्वेऽजिज्ञासितताभिधानस्यार्थांतरत्वाभावे इत्यर्थः। चक्षुरादेरपीत्यादि। न्यायलक्ष ल्म॰
णे वाक्यत्वनिवेशे गौरवात् परामर्शप्रयोजकत्वमेव न्यायत्वमित्यभ्युपेत्य चक्षुरादेरपि न्यायत्वं किं नाभ्युपेय ४

ते इति भावः। आकांक्षाविरहस्तुल्य एवेति नियमस्तत्वे तत्रैवात्रापि जिज्ञासाविरहप्रथमाभिधाने अर्थांतरत्वासं
पादक इत्यर्थः। यदि च नियमस्तत्वे इत्यनिवेशस्तामाम्यतोऽजिज्ञासाभिधानमर्थांतरं स्यादेवान्यथा चहूरादिसा
धारणन्यायलक्षणे उक्तनियमबलादनाकांक्षितस्य च हस्तबोऽभिधानेऽर्थांतरप्रसंग इति न तत्साधारणं न्यायल
क्षणमिति विभाव्यते नूद्दावाक्यत्वघटितोपदर्शितन्यायलक्षणेपि पूर्वोक्तार्थांतरदोषो दुरुद्धर इति भावः। ये
तु प्रतिज्ञादिपंचावयवजन्यशाब्दबोधेषु तद्विलक्षणमेकां जातिमुपेत्य तथाविधविजातीयशाब्दबोधजनकवा
क्यत्वं न्यायत्वमिति न्यायलक्षणं। एवं प्रतिज्ञादिप्रत्येकावयवजन्यप्रत्येकशाब्दबोधेषु तद्विलक्षणमेकां जाति
मुपेत्य तथाविधविजातीयशाब्दज्ञानजनकत्वं न्यायावयवत्वमिति न्यायावयवलक्षणं वदंति तन्मतमुपन्यस्य
ति। अन्ये त्विति। विजातीयमिति। प्रतिज्ञादिपंचावयवजन्यमहावाक्यार्थबोधमात्रवृत्तिवैजात्यमित्यर्थः। तद्वीज
नकत्वम्। तादृशविजातीयशाब्दज्ञानजनकत्वं तल्लक्षणमिति न्यायावयवलक्षणमित्यर्थः। ज्ञानविशेषेति।
विजातीयशाब्दज्ञानेत्यर्थः। तज्ज्ञानेति। विजातीयशाब्दज्ञानेत्यर्थः। दुर्निरूपमिति। दुरुपपन्नमित्यर्थः। तथा

चि॰म॰ चजनकतावच्छेदकघटितस्यानन्यथासिद्धतन्नियतपूर्ववर्त्तितावच्छेदकधर्मवत्त्वरूपतज्जनकत्वस्य तज्ज्ञानाधी
नतथाविधजनकत्वज्ञानस्य च तज्जनकतावच्छेदकरूपासंभवेनासंभव इति भावः। इतीति। अतो हेतोरित्यर्थः।
५ तत्स्वीकारे तस्यैवेति। एवकारो भिन्नक्रमेणायोज्यः। तथा च तादृशधर्मस्वीकार एव विजातीयशाब्दज्ञानजनकत्वस्य
5 लक्षणत्वसंभवादित्यर्थः। प्रकृते तु तादृशधर्माभावादुपदर्शितस्य लक्षणत्वासंभव इति भावः। न चानुपूर्वीविशेषए
व तादृशधर्मोऽस्तीति वाच्यम्। आनुपूर्वीविशेषस्य पर्वतो वह्निमान्पर्वतोऽग्निमानिति नानाविधप्रतिज्ञादिसा
धारणस्याननुगतस्यासंभवेन तथात्वासंभवादिति। ननु जनकत्वं न जनकतावच्छेदकघटितमपि तु अतिरिक्तं
तथा च तज्जनकतावच्छेदकं विनापि तज्जनकत्वं तादृशजनकत्वज्ञाने बाधकाभावान्नोपदर्शितस्य लक्षण
तस्यन्यायपद जन्यज्ञानस्य =३ त्वासंभव इत्यत आह। अन्यथेति। तदनुगतजनकतावच्छेदकं विनापि तन्निष्ठजातिस्वीकार इत्यर्थः। जाति
संकरप्रसंग इति। तुल्ययुक्त्या एकघटैकपटोभयसाधारणस्यापि जातिविशेषस्य स्वीकारापत्त्या तमादाय घट राम॰
त्वपटत्वादिजातीनां सांकर्य्यप्रसंग इत्यर्थः। तथा चैतादृशबाधकेन तदनुगतजनकतावच्छेदकं विना तन्नि ५

ष्टजातिर्नांगीक्रियत इत्यवश्यंवाच्यम्।एवंचप्रकृतेपिजातिविशेषप्रमाणाभावेनतदघटितलक्षणमनु
पपन्नमेवेतिभावः।तत्रेति।तेषुन्यायावयवेषुमध्ये इत्यर्थः।साध्यनिर्देशः।साध्यबोधकवाक्यम्।साध्यपद इ
ति।वह्निपदादाविवत्यर्थः।तेनापिवह्न्यादिरूपसाध्यबोधजननादितिभावः।किंत्वित्यादि।अत्रतथाविधजन
कत्वेसतीत्यंतंन्यायावयवत्वेसतीत्यर्थकं।उद्देश्यत्वंचतद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकत्वार्थक
म्।तथाविधानुमित्यन्यूनविषयत्वम्।पक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहि
त्वंतथाविधानुमित्यनतिरिक्तविषयत्वं।तथाविधानुमितिविषयताव्याप्तत्वेलक्षणाश्रयविषयताश्र
यकत्वं।एवंचप्रकृतन्यायावयवत्वेसतिपक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकविशिष्टसाध्यवैशि
ष्ट्यावगाहितद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकानुमितिविषयताव्याप्तत्वेलक्षणाश्रयवि
षयताश्रयबोधजनकवाक्यत्वम्।तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकप्रतिज्ञात्वमितित
ल्लक्षणवाक्यार्थः।अत्रोदासीनपर्वतावह्निमानितिवाक्येऽतिव्याप्तिवारणायप्रकृतन्यायावयवत्वेस

नीति। प्रकृततत्वमत्र तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकत्वार्थकं अभिधेयं द्रव्यज्ञानं जन्यज्ञा
नीयं द्रव्यमादित्यादौ हेत्ववयवे विषयतात्वावच्छिन्नपक्षकद्रव्यज्ञानजन्यज्ञानीयत्वसाध्यप्रतिज्ञालक्षणा
तिव्याप्तिवारणाय न्यायावयवे तद्धर्मावच्छिन्नपक्षकत्वनिवेशः। एवं पर्वतो द्रव्यवानित्यादौ द्रव्यव्याप्यधूमवा
नयमित्युपनये द्रव्यव्याप्यधूमत्वावच्छिन्नसाध्यकपर्वतत्वावच्छिन्नपक्षकप्रतिज्ञालक्षणातिव्याप्तिवारणा
य न्यायावयवे तद्धर्मावच्छिन्नसाध्यकत्वनिवेशः। अत्र धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ हेत्वव
यवेऽतिव्याप्तिवारणाय पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वनिवेशः। न च तथाविधहेत्ववयव
जन्यबोधे तथाविधानुमितिविषयताया आवृत्तं यद्धूमज्ञानज्ञाप्यत्वमुख्यविशेष्यतात्वं तदाश्रयीभूतमुख्यविशे
ष्यतारूपविषयताशालित्वस्य त्वेन तच्छून्यत्वरूपविशेषणासत्त्वात्कथं तथाविधबोधाजनके हेत्ववयवेऽतिव्याप्ति — जन्यत्वरूपविशेषण विशिष्टोऽत्यर्थः
रिति वाच्यम्। प्रकृते मुख्यविशेष्यतात्वातिरिक्तस्यैव लक्षणप्रस्य निवेशात्। न च तत्रातिव्याप्तिवारणार्थं पक्षे सा — एतम॰
ध्यवैशिष्ट्यावगाहित्वनिवेशोऽस्तु किं पक्षे पक्षतावच्छेदकवैशिष्ट्यनिवेशनेनेति वाच्यम्। तथा सति द्रव्यात्मेयत्व — ६

वत्त्वमभिधेयं द्रव्यज्ञानजन्यज्ञानीयं द्रव्यादित्यादौ हेत्ववयवे इति व्याप्तिः। तज्जन्यबोधस्य विषयतात्मकाभिधेयप
क्षे साध्यवैशिष्ट्यावगाहित्वात्। न च तथापि साध्ये साध्यतावच्छेदकवैशिष्ट्यनिवेशे प्रयोजनाभाव इति वाच्यम्॥
विषयत्वं प्रमेयादभिधेयवत्त्वाच्च वत् प्रमेयादित्यादौ हेत्ववयवे इति व्याप्तेः तज्जन्यबोधे विषयतात्वरूपपक्षता
वच्छेदकविशिष्टे प्रमेयज्ञानजन्यज्ञानात्मकवाच्यरूपसाध्यवैशिष्ट्यावगाहित्वस्य सत्त्वात्। उपनयस्थायं पदा
नुषंगकल्पे पर्वतत्वविशिष्टे वह्निवैशिष्ट्यावगाहिबोधजनके तस्माद्वह्निमान् इति निगमने पर्वतपक्षकवह्निसा
ध्यकप्रतिज्ञालक्षणातिव्याप्तिवारणाय तथाविधविषयताशून्यत्वनिवेशः। न चात्रानुमितौ तद्धर्मावच्छिन्नप
क्षकत्वनिवेशे प्रयोजनाभाव इति वाच्यम्। अयं पदानुषंगकल्पे तस्माद्वह्निमानिति निगमने पर्वतत्वावच्छि
न्नपक्षकवह्निसाध्यकप्रतिज्ञालक्षणातिव्याप्तिः। तज्जन्यबोधे वह्नित्वावच्छिन्नसाध्यिकाया वह्निव्याप्यधू
मज्ञानज्ञाप्यवह्निमत् सधर्मी पर्वतो वह्निमानित्यनुमितिस्तद्विषयताव्याहतत्वे लक्षणाश्रयविषयताशून्य
त्वसत्त्वात्। न च तथाप्यत्र तद्धर्मावच्छिन्नसाध्यकत्वविशेषणं व्यर्थमिति वाच्यम्। अयं पदानुषंगकल्पे तस्मा

अतिव्याप्तितादवस्थ्यार्थातिव्याप्तिपदस्य
विशिष्टानतिरिक्तमित्यादि=५

चि॰म॰ वह्निमानिति निगमने पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणातिव्याप्तेः। तज्जन्यबो
७ धे पर्वतत्वावच्छिन्नपक्षकवह्निव्याप्यधूमज्ञानज्ञाप्यत्वविशिष्टवह्निसाध्यकानुमितिविषयताव्यावृत्तत्वेन लक्षणा
7 श्रयविषयताशून्यत्वसत्वात्। अत्र च तद्धर्मावच्छिन्नपक्षकत्वं तद्धर्मपर्याप्तावच्छेदकतानिरूपितपक्षवि
शेष्यताकत्वम्। एवं च तद्धर्मावच्छिन्नसाध्यकत्वमपि तद्धर्मपर्याप्तावच्छेदकतानिरूपितसाध्यनिष्ठप्रकारता
शालित्वं बोध्यम्। नातउपदर्शितस्थलेऽतिव्याप्तिरिति ध्येयम्। अथ पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यात् पर्व
तो वह्निमदभिन्न इत्यादिशाब्दबोध एवोत्पद्यते न तु पर्वतविशेष्यकसंयोगसंसर्गकवह्निप्रकारकबोधः ना
मार्थयोरभेदातिरिक्तसंसर्गेणान्वयबोधानंगीकारात्। तथा च प्रतिज्ञावाक्ये पक्षे साध्यवैशिष्ट्यावगाहिबोधा
जनकत्वात् लक्षणमसंभवग्रस्तमिति चेन्न। नामार्थयोरभेदातिरिक्तविभक्त्यर्थातिरिक्तसंसर्गेणान्वयबोध
मतुबर्थाद्यर्थः स्याव्युत्पन्नतया विभक्त्यर्थसंयोगादिसंसर्गेण तयोरन्वयबोधांगीकारे क्षतिविरहात्। अत एव नामार्थयोरन्वय एम॰
बोधे विभक्त्यर्थोपस्थितिहेतुत्वमित्यपि संगच्छते। अन्यथा तादृशान्वयबोधस्याप्रसिद्ध्या तत्कल्पनानुपपत्तेरि ७

तितुसारं। यदि चानामार्थयोरभेदातिरिक्तसंबंधेनैवान्वयबोधोऽव्युत्पन्न इति मतं तदा एतल्लक्षणासंभव
ग्रस्त तयालक्षणांतरमाह। अन्यूनानतिरिक्तपदमित्यादि। अनुमित्यन्यूनानतिरिक्तविषयकपदमित्यर्थः॥
लिंगाविषयकत्वमिति लिंगपदं लिंगित्वपरं तच्च साध्यतावच्छेदकावच्छिन्नसाध्यगमकतौपयिकहेतुतावच्छे
दकावच्छिन्नहेतुनिष्ठव्याप्तिस्तदात्मकं। तथा च तादृशव्याप्तिविषयताशून्यशाब्दबोधजनकत्वं सति न्यायाव
यवत्वं प्रतिज्ञात्वमिति लक्षणवाक्यार्थः। अत उदाहरणादावतिव्याप्तिवारणाय शून्यांतं शाब्दबोधविशेषणं॥
न चान्वयव्यतिरेकिव्याप्त्युभयसाधारणतादृशव्याप्तित्वस्यैकस्याभावादेकोपादाने चापरविषयकबोधजनके
उदाहरणादावतिव्याप्तेर्नैतत्संभवदुक्तिकमिति वाच्यं। हेतुतावच्छेदकावच्छिन्नहेतुनिष्ठसाध्यतावच्छेद
कावच्छिन्ननिरूपितान्वयव्याप्तिहेतुतावच्छेदकावच्छिन्नहेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नाभावव्याप
कीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्त्योरन्यतरस्य तथाविधव्याप्त्यर्थत्वात्। अत्र वह्निव्याप्यद्रव्यवानप
र्वतो वह्निमान् व्याप्यधूमवान्पर्वतो वह्निमान् इत्यादि प्रतिज्ञासंग्रहाय हेतुतावच्छेदकावच्छिन्नसाध्यता

चि॰म॰अ॰ ८

वच्छेदकावच्छिन्नयोर्निवेशः। न चास्मिन्लक्षणे धूमादितिहेत्ववयवेऽतिव्याप्तिः। तज्जन्यबोधस्यव्याप्यवि
षयकत्वादितिवाच्यम्। हेत्ववयवान्यत्वे सतीति विशेषणोपादानादनुमित्यन्यूनानतिरिक्तविषयकत्वघटि
तलक्षणेनतिरिक्तविषयकत्वस्याव्याप्तिमाह निगमनं चेत्यादि। न च परामर्शहेतुः। नानुमित्यनतिरिक्तवि
षयकशाब्दबोधजनकं सत्न्यायावयवः। एतदेवोपपादयति। अबाधितेत्यादिना। तथा च निगमनजन्यबो
धेनुमित्यविषयाबाधितत्वादिविषयकत्वेनानुमितिविषयताव्याप्त्तं यद्वैलक्षण्यं तदाश्रयीभूतविषयताशू
न्यत्वरूपानतिरिक्तविषयकत्वस्याभावाच्च निगमनेनातिव्याप्तिः। तददाने तु न्यायावयवत्वादिविशेषणघ
टितलक्षणस्य तत्र सत्त्वात्। तत्रापि अतिव्याप्तिर्भवत्येवेति तद्वारणायापि तदुपादानमिति भावः। ननु निगमन
स्य कथमबाधितत्वादिविषयकबोधजनकत्वं तत्र तद्बोधकपदाभावादिति चेन्न। निगमनघटकीभूततत्पद
स्याबाधितत्वादिविशेषणविशिष्टहेतौ लाक्षणिकत्वात्। सर्वनाम्नि न लक्षणेत्यस्य प्रवादमात्रत्वात्। अथवा एम॰
निगमनवाक्येन व्याप्तिविशिष्टहेतुज्ञानज्ञाप्यत्वेन वह्नेर्बोधिते एकवाक्यतया प्रतिज्ञाहेत्ववयवाभ्यां बोधित ८

आकांक्षायां हेतुः=१

वोधनौपयिक
त्वेहेतुः ३

स्यवन्हेर्धूमज्ञाप्यत्वस्यपुनर्वोधनेकिंप्रयोजनमितिप्रयोजनाकांक्षायामवाधितत्वादिवोधस्यैवतथात्वकल्
नेननिगमनस्यावाधितत्वादिविषयकवोधनौपयिकविशिष्टहेतुसंवंधवोधजनकत्वेनावाधितत्वादित्या
दिग्रंथस्यावाधितत्वादिविषयकवोधौपयिकविशिष्टहेतुसंवंधवोधजनकत्वादित्यर्थकत्वात्।वाक्यांतरवोधित
हेतुसंवंधस्यकथमवाधितत्वादिविषयकवोधनौपयिकत्वमितितुनाशंकनीयम्।हेतुरवाधितत्वादिमान्साध्य
निष्ठहेतुज्ञानज्ञाप्यत्ववोधकवाक्यानंतरंएतन्निगमनवोधितसाध्यनिष्ठहेतुज्ञानज्ञाप्यत्वघटकहेतुत्वादित्यनुमाना
दवाधितत्वादिविषयकवोधसंभवेनहेतुतावच्छेदकविधयाहेतुज्ञानज्ञाप्यत्वस्यावाधितत्वादिविषयकवोधजन
कत्वसंभवादिति।प्रतिज्ञालक्षणांतरमाह।हेत्वभिधानेति।हेत्वभिधानप्रयोजिकायावन्हिज्ञानजनकंज्ञानंभवत्वि
तिजिज्ञासातज्जनकवाक्यत्वंप्रतिज्ञात्वमितिप्रकृतलक्षणवाक्यार्थः।जिज्ञासाजनकत्वंचजिज्ञासाप्रयोजक
वोधजनकत्वं।प्रतिज्ञाजन्यवोधेतथाविधजिज्ञासाप्रयोजकत्वंतुतथाविधजिज्ञासाजनकीभूतंयत्वन्हिज्ञानज
नकत्वंज्ञानंतज्जनकतयाएकसंवंधिज्ञानस्यापरसंवंधिस्मारकतयातज्जनकत्वादतोनानुपपत्तिगंधोपीतिध्येय

अर्थकत्वेहेतुः ३

चि॰ प्र॰
९
1

म्। अत्र न्यायावयवत्वे सतीति विशेषणमावश्यकम्। अन्यथोदासीनवाक्येऽतिव्याप्तेरिति। प्रतिज्ञालक्षणं तत्र
माह लिंगाविषयकत्वेत्यादि। लिंगविषयत्वे सति यत् लिंगिज्ञानं तज्जनकवाक्यत्वमित्यर्थः। लिंगाविषयकत्वं चा
त्र पूर्वोक्तमेव ग्राह्यं। नातः पर्वतो वन्हिसामग्रीमान् वन्हेरित्यादिप्रतिज्ञायामव्याप्तिः। लिंगिज्ञानं च लिंगियत्
साध्यं तन्निष्ठविधेयतानिरूपितपक्षतानिष्ठमुख्यविशेष्यताशालि लिंगिज्ञानं बोध्यं। नातो वन्हिमान् वन्हिसामग्री
मत्वादित्यादौ हेत्ववयवेऽतिव्याप्तिः अत्र विशेषणदलव्यावृत्तिमाह। इतरावयवानामित्यादि निगमनादीनामि
त्यर्थः। अन्यथायं पदानुषंगकल्पे तत्रातिव्याप्तेरपरिहारादिति भावः। विशेष्यदलं च पर्वतो वह्निमान् धूमात् प
र्वतत्वज्ञानजन्यज्ञानीयविषयतात्वादित्यादौ हेत्ववयवेऽतिव्याप्तिवारकं उदासीनवाक्यातिव्याप्तिवारणाय न्याया
वयवत्वे सतीति विशेषणमपि बोध्यम्। केषांचिन्मतमाह। प्रतिज्ञात्वमित्यादि। देवदत्तप्रभवत्वादीत्यादिना यज्ञ
दत्तप्रभवत्वादिपरिग्रहः। मतांतरमाह प्रतिज्ञाजन्यमित्यादि। व्यवहारादिति। इयं प्रतिज्ञेति व्यवहारादित्यर्थः। रम॰
प्रतिज्ञावाक्यात् विजातीयबोधानंगीकारे प्रतिज्ञात्वस्य दुर्वचनया तत्प्रकारकज्ञानासंभवेन तत्प्रकारकव्यवहा ९

बोध्यमित्यंतं मैकोऽग्रंथः। विविक्ता क्वि संयद नमध्यमे
न्यायावयवत्वपदाघटितं मूलपाठाभिप्रायो वा ॥

णानुपपत्तेः। व्यवहारं प्रतिव्यवहर्त्तव्यतावच्छेदकप्रकारकव्यवहर्त्तव्यज्ञानस्य कारणत्वादिति भावः। अननुगतरूप
मंतरेणेति। जनकतायाजनकतावच्छेदकघटितत्वात्। जनकताज्ञाने जनकतावच्छेदकज्ञानस्य कारणत्वा
त्। विजातीयज्ञानजनकतावच्छेदकमननुगतधर्ममंतरेण तयोरनुपपत्तेरिति भावः। उक्तस्येवेति। अनुमित्यन्यू
नानतिरिक्तविषयकत्वघटितोपदर्शितधर्मस्येत्यर्थः। अनुसरणीयत्वादिति। विजातीयज्ञानजनकतावच्छेद
कत्वेन तत्रावश्यंमभ्युपेयत्वादित्यर्थः। तथा च तत्र तादृशधर्मस्यावश्यकत्वे तदेव प्रतिज्ञालक्षणमस्तु। न तु वैजा
त्यघटितमुपदर्शितलक्षणं तत्र वैजात्यकल्पनागौरवादिति भावः। एतेनेति। प्रतिज्ञाजन्यबोधमात्रवृत्तिजात्ये
प्रामाण्याभावेनेत्यर्थः। शब्दोऽनित्य इतीत्यादि। लिंगिधीपरपदं न्यायावयवार्थकं तथा च शब्दो नित्य इत्याकार
कं यत् न्यायावयववाक्यं तज्जन्यज्ञानवृत्तिहेतुकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिर्या जातिस्तद्विशिष्टज्ञानज
नकवाक्यत्वं प्रतिज्ञात्वमिति समुदितलक्षणवाक्यार्थः। उदासीनवाक्यजन्यज्ञानवृत्तिजातिविशेषवारणाय
वृत्तित्वांतं जातिविशेषणं। न्यायजन्यमहावाक्यार्थबोधवृत्तिजातिवारणाय अवृत्तित्वांतं निवेशः। अत्रादिपदग्रा

चि॰म॰ त्योदाहरणादेर्वैकल्पिकोपादानमवगंतव्यं नातोवैयर्थ्यापत्तिरिति। प्रतिज्ञाया निष्फलत्वमाशंकते नन्वित्यादि।
१० न साधनांगं। न साधनस्य न्यायस्य। अंगं। घटिका। तथा च निःप्रयोजनत्वात् प्रतिज्ञा न न्यायघटिकेत्यर्थः। ननु तिभावः
10 प्रतिज्ञाया अभावे पक्षे साध्यवत्त्वाग्रहात् हेतुजिज्ञासारूपहेत्वाकांक्षाविरहस्तथा च तदभिधानेऽर्थांतरमिति
तथाविधाकांक्षासंपत्त्यर्थं प्रतिज्ञा आवश्यकीत्यत आह। विप्रतिपत्तेरिति। विप्रतिपत्तिवाक्यादित्यर्थः। पक्षपरिग्रहे।
पक्षे साध्यवत्त्वग्रहे। तत्र पक्षे। साध्यवत्तायां। प्रमाणजिज्ञासायां। ज्ञापकजिज्ञासायां। प्राथम्यादिति। प्रथमो
चितत्वादित्यर्थः। तथा च प्रतिज्ञाया अभावेपि उपदर्शितरीत्या हेत्वाकांक्षासंभवात् प्रथमं हेत्वभिधानमप्यु
क्तमर्थांतरमिति प्रतिज्ञाप्रयोगो निरर्थक इति भावः। विप्रतिपत्त्यग्रेहीति मध्यस्थोक्तविप्रतिपत्त्यपश्चादित्यर्थः
।समयबंधानंतरमिति। दृष्टांतशास्त्रुदाहरणप्रयोगेनैव च शब्दानित्यत्वं साधनीयमित्यादिनियमाभिलापरू
पसमयबंधानंतरमित्यर्थः। शब्दानित्यत्वं साधनीयमित्यादिवादिनः प्रतिवादिन आकांक्षायां प्रश्ने शब्दानि एम॰
त्यत्वमितिहेत्वुपन्यासादिति शेषः। साध्यमिति। साधनीयमित्यर्थः। साध्यनिर्देशं विना। प्रतिज्ञां विना। हेतुवाक्यं। १०

हेत्ववयवः। निःप्रतियोगिकं। निर्विशेष्यकं। अन्वये हेत्ववयवार्थं। बोधयितुं इष्ट इति। प्रभवतीर्थः। तथा च हेत्वव
यवार्थस्य साध्येन्वयं विना जिज्ञासाया अनिवृत्तेर्हेत्ववयवार्थविशेष्यकसाध्योपस्थित्यर्थं प्रतिज्ञा आवश्यकीति भा
वः। ननु प्रतिज्ञायानुपस्थितं साध्यं योग्यतावलात्। हेत्ववयवार्थस्य विशेष्यविधयाऽन्वेष्यतीति प्रतिज्ञाप्रयोगो नि
रर्थक इत्याशंकां निरस्यति। नचेत्यादि। वादिवाक्ये। प्रतिज्ञावाक्ये। अनुपस्थितमपीति। साध्यमिति शेषः। योग्यतये
ति। हेत्ववयवार्थस्य विशेष्यविधयेति शेषः। अतिप्रसंगादिति। पदानुपस्थितार्थस्यापि विशेष्यविधयान्वयबोधां
गीकारे वह्नित्वविशिष्टसाध्यकधूमादित्यादिहेत्ववयवार्थस्य विशेष्यविधयाद्रव्यत्वविशिष्टसाध्यन्वयप्रसंगादि
त्यर्थः। ननु विप्रतिपत्तिवाक्यघटकीभूतसाध्यपदादुपस्थिते साध्ये हेत्ववयवार्थान्वयसंभवात्। साध्योपस्थित्य
र्थं प्रतिज्ञाप्रयोगोनुचित इत्याशंकते।। नचेति। समाधत्ते। तस्या इति। विप्रतिपत्तेरित्यर्थः। अंतरितत्वादित्य
ग्निमतेनेनान्वेति। प्रतिवादिविप्रतिपद्येति। उक्तविप्रतिपत्तिरभावकोटावेव प्रमाणत्वमिति वादिनो विरुद्ध
विप्रतिपत्तिजनकवाक्येनेत्यर्थः। प्रमाणादिव्यवस्थयाचेति। न्यायनयेनैवमयाशङ्क्यानित्यत्वे प्रमाणं वक्तव्य

मितिसमयबंधेनचेत्यर्थः।तथाचनिरुक्तप्रतिवादिविप्रतिपत्त्यानिरुक्तसंबंधेनचविप्रतिपत्तिघटकसाध्यवा
चि॰टी॰म॰ चकपदोपस्थितिनाशान्नततःसाध्योपस्थितिसंभवइतिभावः।ननुनिरुक्तप्रतिवादिविप्रतिपत्तिनिरुक्तस
११ मयबंधयोरावश्यकत्वेसत्येवंसंभवतितदेवनेत्यतआह।परविप्रतिपत्तिमित्यादि।निरुक्तप्रतिवादिविप्रति
पत्तिनिरुक्तसमयबंधंविना।स्थापनायाःप्राथमिकन्यायप्रयोगस्याभावात्।कथकसंप्रदायविरुद्धत्वादि ग्रंथकार=
तिशेषः।तथाचकथकसंप्रदायानुरोधेनतदुभयमावश्यकमितिभावः।अथतथाविधकथकसंप्रदायोऽ
सिद्धइत्यतआह।विप्रतिपत्तिवाक्यस्येत्यादि।विप्रतिपत्तिघटकीभूतसाध्यवाचकपदस्यपक्षपरिग्रहे।प
क्षेसाध्यवत्वग्रहे।पर्यवसिततयाजनकतया।निराकांक्षत्वात्।जनितान्वयबोधकत्वेनाकांक्षाविरहादित्य
र्थः।तथाचाकांक्षाभावादेवतदुपस्थापितेसाध्येनहेत्वर्थान्वयइतिभावः।ननुपक्षःसाध्यवान्नवेतिविप्रति
पत्तिघटकीभूतपक्षःसाध्यवानित्यस्यपुनःप्रतिसंधानरूपात्तस्मात्तदुपस्थापितेसाध्येहेत्वर्थान्वयोनानुप एम॰
पन्नइत्यतआहआहत्तैनोचेति।विप्रतिपत्त्येकदेशभूतस्यपक्षसाध्यवानित्यस्याहत्तेनोहीत्यर्थः।सेवेति।आ ११

उदाहरणत्साध्यं प्रतीयमानमपि न पक्षवृत्तावच्छेदकावच्छेदेनावेति किंतु हेतुमत्तावच्छेदेन निगमनात्तु नरूपनयस्थापायांप दानुषंगतः पक्षे प्रतीयमानमपि साध्यं न हेतुव्यवसंयोगस्तस्मादित्यनेनावरुद्धत्वादिति भावः=२

वृत्तिविषयांभूतपक्षः साध्यवानितिवाक्यव्यक्तिरेवेत्यर्थः। यथाश्रुते व्यवहिततच्छब्दस्य पुनरनुसंधानरूपायाआवृत्तेः प्रतिज्ञात्वस्य शब्दधर्मस्याभावादनुपपत्तेः शंकते। नचेति। अवयवांतरात्। उदाहरणरूपावयवघटकसाध्यावाचकपदात्। हेत्वन्वययोग्यतेतिहेत्ववयवार्थान्वययोग्यतेत्यर्थः। व्यतिरेक्युदाहरणे साध्यवाचकपदाभावात् सर्वत्र दर्शितरीत्या साध्योपस्थितिर्न संभवतीत्यतः प्रकारांतरमाहनापीति। केचित्तु उदाहरणघटकीभूतसाध्यवाचकपदादुपस्थिते साध्ये हेत्ववयवार्थान्वयेपि पक्षः कुतः साध्यवानित्याकांक्षाया अनिवृत्तिरतः प्रकारांतरमाहनापीत्याहुः। अवयवांतरेण। उपनयरूपावयवेन। आक्षेपात् प्रतीतस्यार्थान्वयानुपपत्त्या साध्यवत्तया पक्षस्यानुमानात्। हेत्ववयवार्थान्वययोग्यसाध्यस्योपस्थितिरिति पूर्वेणान्वयः। प्रथमाशंकायां दोषमाह। साध्यान्वय इति। साध्ये हेत्ववयवार्थान्वये कथमस्यगमकत्वमित्याकांक्षया उदाहरणाभिधानमुदाहरणाभिधाने च तद्घटकीभूतसाध्यवाचकपदात् साध्यस्योपस्थित्या साध्ये हेत्वन्वय इत्यन्योन्याश्रय इत्यर्थः। नापीत्यादि द्वितीयकल्पं दूषयति। तस्मादित्यादि। तस्मात् उपन

यद्रूपात्त्रवयवात् । प्रतीत्यन्यथानुपपत्त्या स्वार्थस्य साध्यव्याप्यवत्त्वस्याप्रतीतिस्तदन्यथानुपपत्त्या । प्र
चिं॰टी॰म॰ तीतान्यथानुपपत्त्या वाप्रतीतो यः स्वार्थः साध्यव्याप्यवत्त्वं तदन्यथानुपपत्त्या वा । आक्षेपः पक्षे साध्यव
१२ त्त्वानुमानं । इह हेत्ववयवप्रयोगात् । पूर्वकाले । नास्त्येव । न संभवतीत्यर्थः । अयं भावः पक्षे साध्यवत्त्ववि
नापि साध्यव्याप्यवत्त्वप्रतीतिसंभवात् । उपनयार्थसाध्यव्याप्यवत्त्वप्रतीत्यन्यथानुपपत्त्या तत्कल्पनासं
भवे कथं तया तदा तत्कल्पनं । कथं वोपनयवाक्यात् । प्रतीतं यत् स्वार्थव्याप्यत्वं तदन्यथानुपपत्त्या तदाप
क्षे साध्यवत्त्वकल्पनं तस्योपनयोत्तरकालीनतया हेतुप्रयोगपूर्वकाले तदसंभवादिति । इदं तु समाधिसौ
कर्यादुक्तं । वस्तुतस्तु तत्कल्पनासंभवेपि न क्षतिः । पदोपस्थितार्थस्यैव शाब्दबोधे भाननियमेन तथोपस्थि
तार्थस्य हेत्ववयवजन्यशाब्दबोधे भानासंभवादिति । प्रतिज्ञायाः साधनांगत्वे निवंधकारमतमाह । अन्ये
त्विति । शब्दानित्यत्वं साधये त्येवमध्यस्थस्य प्रश्नः सांप्रदायिक इत्यत आह । यदीति । मध्यस्थस्येत्युपलक्ष एम॰
णं । प्रतिवादिनः इत्यपि द्रष्टव्यं । अनुयोगः प्रश्नः । नाकांक्षा । न प्रश्नः । विशिष्टइति शब्दानित्यत्वग्राहकत्व १२

विशिष्ट इत्यर्थः। विशिष्टं चेति। शब्दानित्यत्वग्राहकत्वविशिष्टं चेत्यर्थः। विशेषणं साध्यमित्यादि शब्दानित्यत्व
बोधकं वाक्यं विनेत्यर्थः। नवाक्याभिधानमिति। न विशिष्टबोधाभिप्रायप्रयुक्तहेत्ववयवेन बोधयितुं शक्यमित्य
र्थः। [illegible] तथा च हेत्ववयवात्। तथाविधविशिष्टबोधोपपत्त्यर्थं प्रतिज्ञाप्रयोग आवश्यकः। अन्य
था तथाविधविशिष्टघटकीभूतशब्दानित्यत्वादेः पदादुपस्थितिं विना शाब्दबोधे भानासंभवेन तथाविधविशिष्ट
विषयकशाब्दबोधासंभवादिति भावः। ननु तथाविधविशिष्टे न प्रश्नः किंतु पक्षे यत्साध्यं वस्तुगत्या तद्बोधकं य
त्प्रमाणं तत्रैवेत्याशंकते। न चेति। वस्तुतो वस्तुगत्या यत्साध्यमिति। पक्षे इति शेषः। आशंकां निराकरोति। वा
दिद्वयसाध्य इति वादिप्रतिवादिसाध्यविचारस्थल इत्यर्थः। तदसंभवादिति। अनुभवाभावेन तथाविधप्रश्न
स्याभावादित्यर्थः। उपसंहरति। तस्मादिति। हेतोराकांक्षेति। हेत्ववयवाभिधानप्रयोजकीभूतजिज्ञासेत्यर्थः। न
चेत्यादि। न चोपदर्शितविशिष्टान्वयबोधजनकत्वमित्यर्थः। साधनांगमिति। साधनस्य न्यायस्य घटके इत्यर्थः।
प्रतिज्ञानंतरं हेतुरेवोम्दाको न तूदाहरणमित्यत्र विनिगमकमाह। साध्यनिर्देशानंतरमित्यादि। कुत इत्याकांक्षा

चि०म०

१२

13

यां।कुतःपर्वतोवह्निमानितिजिज्ञासायाम्।साधनताव्यंजकविभक्तिमल्लिंगवचनंज्ञापकताबोधकपंचमीवि
भक्तिमच्छब्दादिबोधकशब्दप्रयोगस्वरूपहेत्ववयवाभिधानं।अन्यथाप्रतिज्ञांतरमुदाहरणाद्यभिधाने।अना
कांक्षिताभिधाने।अजिज्ञासिताभिधाने।निग्रहात्।अजिज्ञासिताभिधानात्मकार्थांतररूपनिग्रहस्थानप्र
संगात्।ननुकुतइत्याकांक्षायांहेत्ववयवप्रयोगेयुक्तिभावइत्यतआह।लोकेइति।न्यायप्रयोगातिरिक्तस्थ
लइत्यर्थः।तथैवेतियत्र।जिज्ञासारूपाकांक्षातद्बोधकशब्दप्रयोगेनैवेत्यर्थः।आकांक्षानिवृत्तेरिति।जिज्ञा
सारूपाकांक्षानिवृत्तिदर्शनादित्यर्थः।तथाचस्थलांतरेतथादर्शनात्।प्रकृतेपितथाविधाकांक्षायांहेत्वव
यवाप्रयोगेतथाविधाकांक्षायाअनिवृत्तेस्तन्निवृत्त्यर्थमेवतदुत्तरंहेत्ववयवप्रयोगआवश्यकइतिभावः।हे
त्ववयवलक्षणमाह।अनुमितिकारणीभूतेत्यादि।अत्रप्रथमजनकांतंन्यायावयवार्थकंतथाचन्यायावय
वत्वेसतिसाध्यविषयकशाब्दबोधजनकत्वेसतिहेतुत्वप्रतिपादकविभक्तिघटितवाक्यत्वंहेत्ववयवत्वं।अ एम०
त्रोदासीनवाक्येऽतिव्याप्तिवारणायप्रथमसत्यंतं।निगमनेऽतिव्याप्तिवारणायद्वितीयंसत्यंतं।व्यतिरेक्यु १२

दाहरणेइतिव्याप्तिवारणायविशेष्यदलं।अत्रहेतुत्वपक्षकप्रतिज्ञास्थलेव्यतिरेक्युपनयेऽतिव्याप्तिवारणा
यविभक्तिपदं।नन्वत्रपर्वतोवह्निमान्वह्निसामग्रीमत्त्वादित्यादौहेत्ववयवेऽव्याप्तिः।तत्रसाध्याविषयक
बोधाजनकत्वादितिचेन्न।साध्याविषयकत्वदलेनैवहेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषय
ताबहिर्भावेनयासाध्यविषयतातच्छून्यत्वस्यविवक्षणात्।नचतथाविधविषयताबहिर्भावेतस्यदुर्व
चत्वात्।नएतत्संभवदुक्तिकमितिवाच्यं।हेतुतावच्छेदकविषयताहेतुविषयताहेतुत्वविषयताएतत्त्रि
तयभिन्नत्वस्यतदर्थत्वात्।नचतथाप्येकत्वादिसाध्यस्थलेहेत्ववयवेऽव्याप्तिः।तत्रतथाविषयताभिन्नायासा
ध्यात्मकसुप्विभक्त्यर्थैकत्वविषयतातच्छालिबोधजनकत्वादितिवाच्यम्।इतरावयवजन्यबोधवृत्तित्वविशिष्ट
स्यतदर्थत्वात्।तथाचेतरावयवजन्यबोधवृत्तित्वविशिष्टसाध्यविषयताशून्यशाब्दबोधजनकत्वेसतिउपदर्शि
तविशेषणविशिष्टवाक्यत्वंहेत्ववयवत्वमितिलक्षणनिष्कर्षः।नचात्रसाध्यपदंव्यर्थमितिवाच्यम्।यथासंनिवे
शेवैयर्थ्याभावात्।नचतथापिनिष्प्रयोजनंतदितिनाशंकनीयम्।विशेष्यदलसार्थक्यस्यतत्प्रयोजनत्वात्।

लक्षणांतरमाह।हेतुत्वप्रतिपादकेति।स्वार्थेहेतुत्वमुख्यविशेष्यकान्वयबोधजनकविभक्तिमन्न्यायावयवत्त्वंहेत्व
चि·म: वयवत्त्वमित्यर्थः।अत्रनिगमनेऽतिव्याप्तिवारणायमुख्येति।प्रकारताभिन्नेत्यर्थः।हेतुत्वंप्रमेयमितिप्रतिज्ञादा
१४ वतिव्याप्तिरितिवाच्यम्।तयोपरस्पराऽन्वितस्वार्थविषयकशाब्दबोधजनकत्वस्याप्युत्पन्नत्वतयातत्रप्रतिज्ञाघटक
14 धूमादिशब्दार्थेहेत्ववयवार्थान्वयासंभवेनतथाविधन्यायप्रयोगाभावात्।नचतथाविधव्युत्पत्तौमानाभावइ
तिवाच्यम्।तथासतिघटेभूतलेभूतलेघटस्सेत्यादिवाक्यादपिघटवृत्तिभूतलवृत्तित्वं·भूतलवृत्तिघटसंबंध
इत्यन्वयबोधप्रसंगात्।नचैवंसतिक्रयात्चैत्रस्यधनमित्यत्रषष्ठ्यर्थस्वत्वेजन्यत्वरूपपंचम्यर्थस्यानन्वयप्र
संगइतिवाच्यम्।तत्रचैत्रपदस्यचैत्रस्वत्वेलाक्षणिकतयाचैत्रपदार्थस्वत्वस्यैवपंचम्यर्थान्वयात्।नचचैत्रप
दस्यचैत्रस्वत्वेलाक्षणिकतयाषष्ठ्यर्थस्वत्वेतस्यानन्वयप्रसंगइतिवाच्यम्।अभेदसंसर्गेसोपितथान्वयसंभ
वात्।अथवातत्रषष्ठ्याश्रयत्वेलक्षणातथाचतत्रनिरूपितत्वसंबंधेनचैत्रपदार्थस्वत्वस्यान्वयसंभवेनानु एम०
पपत्त्यभावइति।लक्षणांतरमाह।उदाहरणेत्यादि।उदाहरणप्रयोजिका।उदाहरणजन्यबोधनिवर्त्यायाजिज्ञा १४

वय
सारूपाकांक्षातज्जनकशाब्दज्ञानजनकन्यायावयववत्त्वं हेत्वयवत्वमित्यर्थः। अवेतएवयवेऽतिव्याप्तिवारणा
यप्रथमजनकत्वांतंशाब्दबोधविशेषणं। लक्षणांतरमाह। साध्याविषयकेत्यादि। अत्रानुमितिपरशब्दो
न्यायावयवार्थकः। साध्याविषयकज्ञानजनकत्वेसतिहेतुपंचम्यंतंन्यायावयववत्त्वंहेत्वयवत्वमित्यर्थः। अ
त्रघटेनदंडात्महानसीयोवन्हिर्नधूमादित्यादिप्रतिज्ञानिगमनयोर्वारणायसत्यंतंपूर्वोक्तार्थकं। व्यतिरे
कउपनयेऽतिव्याप्तिवारणायहेतुपंचम्यंतेतोपन्यासः। अत्रहेतुत्वप्रतिपादकपदार्थकहेतुपदपंचमीप
दयोर्वैकल्पिकोपादानात् नान्यतरवैयर्थ्यं। नचैवंसतिघटशब्दोहेतुत्वप्रतिपादकविभक्तिघटितशब्दत्वा
भाववान् विभक्तिघटितशब्दत्वाभावात् इत्यादौयत्रयत्रहेतुत्वप्रतिपादकविभक्तिघटितशब्दत्वंतत्रतत्र
विभक्तिघटितशब्दत्वंयथावन्हिमान्धूमादित्यत्रवह्निमदितिशब्दरूपदृष्टांतशाब्दोदाहरणेऽतिव्याप्तिरि
तिवाच्यम्। उदाहरणस्यत्वेनविशेषणात्। लक्षणांतरमाह। प्रतिज्ञावाक्येत्यादि। प्रतिज्ञावाक्यजन्यशाब्दबो
धजन्यायाकुतोवन्हिमानितिजिज्ञासारूपआकांक्षातन्निवर्तकशाब्दबोधजनकत्वेसतिहेतुविभक्तिमन्न्या

यावयवत्वं हेत्ववयवत्वमित्यर्थः। प्रतिज्ञादावतिव्याप्तिवारणाय सत्यंतं। निगमनजन्यबोधस्यापि तादृशजि
ज्ञासानिवृत्तिस्वरूपयोग्यत्वेन तत्रातिव्याप्तिवारणाय हेतुविभक्तिमदिति। तदर्थस्तु हेतोरबाधितत्वादिबोधहे
तोः या विभक्तिः यत्तात्पर्यकं तद्वदिति निगमनान्यत्वमिति तु फलितार्थः। उदसीनवाक्येऽतिव्याप्तिवारणा
यन्यायावयवत्वेति। लक्षणांतरमाह। पंचमंतलाक्षणिकेति। पंचम्यंतं यत्तल्लाक्षणिकं पदं तद्घटितन्यायाव
यवत्वं हेत्ववयवत्वं तस्माद्वह्निमानिति निगमनस्य पंचम्या अपि ज्ञाप्यत्वे लाक्षणिकतया लाक्षणिकपंच
मीपदवन्निगमनेऽतिव्याप्तिवारणाय पंचम्यंतेतीति तु दीधितिकृतः। तत्र सर्वनामपदसलाघवात्। घट
त्वपटत्वादिस्वरूपजातिविशिष्टशक्ततया निगमनस्य तत्तद्दोसवह्निव्याप्यधूमादिज्ञानलाक्षणिक
त्वेन तद्धानेपि तत्रातिव्याप्तिवारणाशक्यतया लाक्षणिकपदस्य प्रकृते हेतुतावच्छेदकातिरिक्तधर्मानव
च्छिन्नहेतुविषयताकज्ञानलाक्षणिकार्थावश्यकत्वेनैव तत्रातिव्याप्तिवारणे संभवे पंचम्यंतपदस्य त
त्र व्यावृत्तिदानासंभवात्। किंतु पर्वतविशेष्यकज्ञानं सविषयकं पर्वतादिस्तादोसविषयकत्वव्याप्यपर्वत

वानयमित्युपनयेऽतिव्याप्तिवारणाय पंचमं तत्पदोपादानं। तुल्ययुक्त्या तत्रायंपदस्य पर्वतविशेष्यकज्ञानला
क्षणिकत्वात्। अयं दंडात् ज्ञातो घटत्वादित्यादौ प्रतिज्ञायामतिव्याप्तिवारणाय लाक्षणिकेति। न चैवमपि धू
मात् वन्हिमतः सधर्मा पर्वतो वन्हिमान् धूमादित्यादौ प्रतिज्ञायामतिव्याप्तिरिति वाच्यम्। पक्षतावच्छेदका
वच्छिन्नविषयतानिरूपितसाध्यविषयतानिरूपितस्वार्थविषयताशालिबोधजनकपंचम्या एव पंचमीप
देन विवक्षितत्वादिति। लक्षणं संगमयति। हेतुपदेनेत्यादि। ज्ञानलक्षणात् धूमादिज्ञानलक्षणात्। हेत्वव
यवे लक्षणसमन्वय इति शेषः। ननु हेतुस्थधूमादिपदस्य तत्र ज्ञानलाक्षणिकत्वे प्रमाणाभाव इत्यत आह।
अन्यथेति। तस्य तदलाक्षणिकत्व इत्यर्थः। लिंगस्याहेतुत्वेनेति। धूमादेः साध्यज्ञानाजनकत्वेनेत्यर्थः। हेतु
विभक्त्यनन्वयादिति। धूमादिपदार्थान्वितपंचमीविभक्त्यर्थस्य ज्ञाप्यत्वस्य साध्येऽनन्वयप्रसंगादित्यर्थः बाधा
दिति भावः। ननु तस्य साध्येनन्वये का क्षतिरित्यत आह। तथैवेति। साध्ये हेत्ववयवार्थस्यानन्वये नैवेत्यर्थः।
आकांक्षाया निवृत्तेः कुतो वन्हिमानिति जिज्ञासाया निवृत्तेस्तथा च तादृशजिज्ञासाया निवृत्त्यर्थं साध्ये हेत्व

वयवार्थान्वयवोधस्यावश्यकतया तथा वक्तुमशक्तत्वादिति भावः। एतत्सर्वं धूमादिज्ञानस्यानुमितिकरणतापक्षे
चिं॰टी॰म॰ ज्ञेयं। ज्ञायमानलिंगकरणतावादिनये तु धूमादिपदस्य लाक्षणिकत्वाभावेपि नानुपपत्तिगंधइति ध्येयं। कस्य
१६ चित्लक्षणमाह। अनुमितीत्यादि। अनुमितिजनकीभूतं यत्शाब्दज्ञानं तज्जनकीभूतं यत् धूमवत्वादि
तिशब्दजन्यसंज्ञानं तद्वृत्तित्वे सति प्रतिज्ञोदाहरणादिचतुष्टयजन्यज्ञानावृत्तिर्या जातिस्तद्योगिज्ञानजनकवा
16 क्यत्वं हेत्ववयवत्वमिति लक्षणवाक्यार्थः। अत्र धूमवत्वादित्याद्युदासीनवाक्ये तिव्याप्तिवारणाय सत्यंतं जा
तिविशेषणं। सत्तागुणत्वशाब्दत्वादिजातिमादाय प्रतिज्ञादावतिव्याप्तिवारणाय अवृत्तित्वांतं जातिविशेष
णं। अत्र प्रतिज्ञादिचतुष्टयस्य वैकल्पिकोपादानं वोध्यं। नातएकतरनिवेशे अन्यतरवैयर्थ्यापत्तिः। एत
देवमतं दूषयति। जातिंविनेति। अनुमितिजनकतावच्छेदकत्वेन सिद्धां परामर्शत्वरूपजातिं विनेत्यर्थः। ज्ञा
नस्येति प्रतिज्ञादिपंचवाक्यजन्यमहावाक्यार्थवोधस्येत्यर्थः। अयंभावः। परामर्शत्वरूपेण तथाविधमहावाक्या ए॰म॰
र्थवोधस्य कारणत्वं न संभवति। परामर्शत्वजातिसत्वेमानाभावात् तदतिरिक्तरूपेण तस्य जनकत्वे तु प्रमा १६

णाभावस्तथाच तथाविधमहावाक्यार्थबोधस्यानुमितिजनकत्वासंभवेन लक्षणमसंभवग्रस्तमिति भावः। न
न्वेवं सति कारणांतनिवेशं विनैव लक्षणं करणीयमित्यत आह। वाक्यविशेषजन्यत्वस्यापीति। न्यायावयव
घटकीभूतधूमवत्त्वादितिशब्दविशेषजन्यत्वस्यापीत्यर्थः। जन्यतावच्छेदकरूपापरिचय इति। उदासीन
वाक्यजन्यबोधव्यावृत्तजन्यतावच्छेदकं विनेत्यर्थः। दुर्ग्रहत्वात्। अतिव्याप्तिवारकत्वेन दुर्ग्रहत्वात्। अति
व्याप्तिवारणाशक्यत्वादिति यावत्। तथाचोदासीनवाक्यजन्यबोधव्यावृत्तन्यायघटकीभूततथाविधवा
क्यजन्यवृत्तिजातिविशेषे प्रमाणाभावात्। लक्षणमुदासीनवाक्ये अतिव्याप्तमिति भावः। वस्तुतस्तु धूम
वत्त्वादिति वाक्यजन्यबोधवृत्तिजातिविशेषे प्रमाणाभावेन तथाविधलक्षणमसंभवदुक्तिकमिति ध्येयं।
हेत्ववयवस्य सामान्यलक्षणमभिधाय विशेषलक्षणमाह। अन्वयेत्यादि। अन्वयव्याप्तिबोधकशब्दाभि
धानप्रयोजकजिज्ञासाजनकत्वे सति हेतुप्रतिपादकविभक्तिमद्वाक्यत्वमन्वयिहेत्ववयवत्वमित्यर्थः। अ
त्र धूमादालोकवान् पर्वतो वन्हिमानित्यादिप्रतिज्ञायामतिव्याप्तिवारणाय सत्यंतं। जनकत्वमत्र फलो

पधायकत्वलक्षणं बोध्यं। नातःस्वरूपयोग्यतामादायतद्दोषस्य तदवस्थत्वं। यत्रोदाहरणं तमेव प्रयुक्तं तत्र
चिः टीः मः त्पहेतोरलक्ष्यत्वात्तत्रातिव्याप्तिवारणाय हेतुत्वप्रतिपादकेत्यादिविशेष्यदलं हेत्ववयवार्थकं अत्र हेतुत्वप्र
१८ तिपादकविभक्तिमत्त्वमायावयवत्वमितिपाठस्तु प्रामादिकः। विभक्त्यंशस्याव्यावर्त्तनीयाभावात्। व्यतिरेकि
17 हेत्ववयवलक्षणमाह। एतदेवेति। अव्यवहितोक्तलक्षणमेवेत्यर्थः। व्यतिरेकेत्यादि। अन्वयव्याप्त्यभिधा
यकत्वविशेषणं दूरीकृत्य व्यतिरेकव्याप्त्यभिधायकत्वविशेषणदाने इत्यर्थः। अन्वयव्यतिरेकिहेत्ववयव
लक्षणमाह। अन्वयव्यतिरेकोदाहरणेत्यादि। अन्वयव्याप्त्यभिधायकशब्दप्रयोजनकजिज्ञासाजनक
त्वे सति व्यतिरेकिव्याप्त्यभिधायकशब्दप्रयोजकजिज्ञासाजनकं यत् ज्ञानं तत् ज्ञानजनकहेत्ववयवत्व
मन्वयव्यतिरेकिहेतुत्वमित्यर्थः। यदि च कुतोऽस्य गमकत्वमित्याकांक्षायाः एकव्याप्त्यभिधानेनैव नि
रस्तत्वात्। व्याप्त्यन्तराभिधानेऽर्थान्तरं स्यादिति एकदोभयव्याप्तिबोधकशब्दप्रयोगाभावेन लक्षणमसं एम०
भवग्रस्तमिति विभाव्यतेतदाह। यदेति। पक्षवृत्तित्वे सति सपक्षवृत्तित्वे सति विपक्षावृत्तिर्ये हि हेतुस्तद्बोध १८

कहेत्ववयवत्वमन्वयिव्यतिरेकिहेतुत्वमित्यर्थः। अत्रस्वरूपासिद्धहेतुबोधकआभासीभूतहेत्ववयवेअति
व्याप्तिवारणायप्रथमसत्यंतंव्यतिरेकिहेत्ववयवेअतिव्याप्तिवारणायद्वितीयंसत्यंतंतत्रसपक्षत्वंनिश्चित
साध्यवत्वं। व्यभिचारिहेतुबोधकआभासीभूतेव्यतिरेकिहेत्ववयवेकेवलान्वयिहेत्ववयवेवातिव्याप्तिवार
णायविपक्षाद्वृत्तित्वांतंविपक्षत्वमत्रसाध्याभाववत्वं। निर्णयनिवेशेप्रयोजनाभावादिति। एतन्मतेपर्वतो
वन्हिमान्धूमादित्यादौहेत्ववयवस्यान्वयव्यतिरेकितयापूर्वोक्तकेवलान्वयिहेत्ववयवलक्षणंतत्रातिव्या
प्तमतः केवलान्वयिहेत्ववयवलक्षणांतरमाह। अत्यंताभावेति। वृत्तिमदत्यंताभावप्रतियोगितावच्छेद
कसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यपक्षवृत्तिसपक्षवृत्तिहेतुबोधकहेत्ववयवत्वंकेवला
न्वयिहेतुत्वमित्यर्थः। एतन्मतेकेवलान्वयिसाध्यकहेतोरेवात्रलक्ष्यतयानानुपपत्तिः। अत्रान्वयिव्यतिरेकि
हेत्ववयवातिव्याप्तिवारणायानवच्छेदकांतंसाध्यतावच्छेदकविशेषणंआकाशाभावसाध्यकहेत्ववयवे
अतिव्याप्तिवारणायवृत्तित्वमत्यंताभावेविशेषणं। सर्वमभिधेयंप्रमेयत्वादित्याद्यनुपसंहारिहेत्ववयववा

चिं॰टी॰मः
१८
18

रणायनिश्चितसाध्यवद्वृत्तित्वरूपसपक्षवृत्तित्वं हेतुविशेषणं दृशाविशेषे वह्न्यादिसाध्यकधूमादिहेतोरन्वयि
त्वमंगीकुर्वतामाचार्याणां मतमाह। यद्वेत्यादि। अत्रोदासीनवाक्यातिव्याप्तिवारकं कारणं तन्मायावयवार्थ
कं धूमात्वन्हिमतः सधर्मापर्वतो वन्हिमान् धूमादित्यादौ प्रतिज्ञायामतिव्याप्तिवारणाय जनकान्तंश
दृविशेषणं तदर्थस्तु पूर्वोक्तहेत्ववयवसामान्यलक्षणवत्त्वोद्भव्यः। नातो वन्हिमान् वन्हिसामग्रीमत्वा
दित्यादौ हेत्ववयवे अतिव्याप्तिः। व्यतिरेकिहेतावतिव्याप्तिवारणाय प्रतीतेत्यादि प्रतीतः साध्यान्वयः। सा
ध्यसहचारमात्रं यत्रेतादृशं यत् साधनं तद्बोधकेत्यर्थः। प्रतीतान्वयसाध्येत्यादिपाठेपि साध्यपदस्य व्या
प्ययेनान्वयं कृत्वा पूर्वोक्त एवार्थो बोध्यः। एतन्मतेऽन्वयव्यतिरेकिस्थलेपि कदाचित् व्यतिरेकिप्रयोगा
त्। पूर्वोक्तव्यतिरेकिहेत्ववयवलक्षणमतिव्याप्तमतस्तल्लक्षणान्तरमाह। एतदेवेत्यादि। इदमुपलक्ष
णं। एतदेव प्रतीतो भयसहचारेत्युपादानात्। अन्वयिव्यतिरेकिहेतुलक्षणमित्यपि द्रष्टव्यं। अतः पर्व एम॰
तो वन्हिमान् धूमादित्यत्र धूमहेतोर्दशाविशेषे अन्वयव्यतिरेकित्वेपि न क्षतिः। ननु प्रतिज्ञादित्रयावय १८

वयादिनां मीमांसकानां मते हेतोः पक्षवृत्तित्वभानार्थं धूमवत्वादिति मतुप्संबंधिहेतुप्रयोगोस्तु प्रतिज्ञा
दिपंचावयववादिनां नैयायिकानां मते तु कथं स्तेषां मते उपनयवाक्यादेव हेतोः पक्षवृत्तित्वलाभाद
तो नैयायिकमते मतुप्संबंधिहेतुप्रयोगाभावे इष्टापत्तिमाह। कथायामित्यादि। वादिप्रतिवादिनोर्विचा
र इत्यर्थः। सामान्यावयवत्वे इष्टस्य शब्दानित्यत्वे साध्ये इत्यादिः। इत्यपार्थकविशेष इति। हेत्ववयवान्वय
बोधाजनकमित्यर्थः। एतदेव प्रतिपादयति। विभक्त्युपस्थापितेनेत्यादि। हेतुत्वेनेत्यस्यानन्वयादित्यने
नान्वयः। विभक्त्यंतराविरुद्धस्य। सतिसप्तम्यर्थसमानकालीनत्वाद्यन्वितस्य। तथा चैकविभक्त्यर्थाविरुद्धवि
भक्त्यंतरार्थस्यान्वये निरर्थकोक्ततया उपदर्शितस्थले सामान्यवत्वविशिष्टवात्वेन्द्रियकरणकप्रत्यक्षविष
यत्वरूपविशिष्टहेतोः पंचम्यर्थहेतुत्वस्य विशेषणेन्वयासंभवे नान्वयासंभवात्। तथाविधविशिष्टहेतु
स्थले तादृशहेतुप्रयोगो न कर्त्तव्य इति भावः। सप्तमीबलादिति। सामानाधिकरण्यार्थसतिसप्तमीबलादि
त्यर्थः। उपस्थिताविति। सत्तामिति शेषः। विशिष्टहेतुत्वान्वयादिति। सामानाधिकरण्यसंबंधेन सामान्यवत्व

चिं॰टी॰ १९ विशिष्टतथाविधप्रत्यक्षविषयत्वरूपहेतावित्यर्थः।हेतुत्वान्वयादिति।पंचम्यर्थहेतुत्वान्वयसंभवादित्यर्थः।त
थाचयत्रविभक्त्यर्थःसंबंधमर्यादयानभासतेतत्रैवोपदर्शितव्युत्पत्त्यवकाशः।एवंचप्रकृतेसतिसप्तम्यर्थसा विभक्त्यंतराणावरु
मानाधिकरण्यसंबंधेनतथाविधप्रत्यक्षविषयत्वान्वितसामान्यवत्वेपंचम्यर्थहेतुत्वस्यान्वयसंभवात्।ताद ढेविभक्त्यनन्वयः ॥२॥
19 शविशिष्टहेतुस्थलेतथाविधप्रयोगोनानुपपन्नइतिभावः।ननुतथान्वयस्वीकारेनामार्थयोरभेदातिरि
क्तसम्बन्धेनान्वयबोधाभावइतिव्युत्पत्तिविरोधइत्यतआह।तथैवेति।अभेदातिरिक्तत्वस्यैवविभक्त्युप
स्थापितातिरिक्तत्वस्यापिनिवेशेनैवेत्यर्थः।व्युत्पत्तेःनामार्थयोरन्वयबोधाभावव्युत्पत्तिकल्पनात्।ननु
सतिसप्तम्याश्चदैशिकसंबंधघटितसामानाधिकरण्यमर्थस्तदैवसंभवतितदेवनगोषुदुह्यमानास्वाग
तइत्यत्रकालिकत्वार्थकत्वेनतन्निर्णयादित्यतआह।नहीत्यादि।अयमर्थः।दैशिकसंबंधघटितसामाना
धिकरण्यरूपार्थः।अस्मात्।शब्दात्।सतिसप्तमीपदात्।तथाचसतिसप्तम्यानानार्थकत्वमितिभावः।ननु एम॰
हेतुप्रयोगानंतरंव्याप्तिबोधकमुदाहरणमेवप्रयुज्यतेनतूपनयइत्यत्रविनिगमकाभावः।व्याप्तेरिवपक्ष १९

धर्मतायाअपि गमकतौपयिकत्वादित्यत आह। हेतावित्यादि। अस्य लिंगज्ञानस्य। इत्याकांक्षायां। इति जिज्ञासायां। साधम्यात्। पराम(?)शार्थं व्याप्तेः प्रथमोपस्थाप्यत्वात्। तत्प्रदर्शनाय व्याप्तिप्रदर्शनाय। उदाहरणं। उपनयात् पूर्वमुदाहरणप्रयोगः। वस्तुतस्तु। कथमस्य गमकत्वमित्याकांक्षायाः। किंप्रकारकं लिंगज्ञानं गमकमित्यर्थकत्वे प्रथमतः। पक्षधर्मताप्रदर्शनमेवन प्रसक्तमस्तीति ध्येयं। अनुमितीत्यादि। अत्र जनकांतमुदासीनवाक्यवारकं न्यायावयवार्थकं। व्याप्यत्वाभिमतवन्निष्ठपदं प्रकृतहेतुविशिष्टनिष्ठपरं॥ नियतव्यापकत्वाभिमतेति। नियतस्य। साध्यनियतस्य हेतोर्यत् व्यापकत्वं तद्विशिष्टसाध्येत्यर्थः। तथा च न्यायावयवत्वे सति प्रकृतहेतुमति प्रकृतहेतुव्यापकत्वविशिष्टसाध्यसंबंधबोधकवाक्यत्वमुदाहरणत्वमित्यर्थः। उदाहरणवाक्यत्वात्। स्वघटकीभूतवीप्सासमभिव्याहृतसाध्यबोधकपदस्य हेतुव्यापकत्वविशिष्टसाध्यलाक्षणिकतया तथाविधव्यापकत्वविशिष्टबोधोदयात्। तत्र लक्षणसमन्वयः। अत्र हेत्ववयवादावतिव्याप्तिवारणाय प्रकृतहेतुविशिष्टेत्यादि। उदाहरणसामान्यलक्षणमभिधाय तद्विशेषलक्षणमाह। साध्येत्यादि। साधनसंबंधः। साध्यनिष्ठसाध

नन्वेतत्सामान्यलक्षणस्य व्यतिरेक्युदाहरणे कथं लक्षणसंगतिरिति चेन्न निष्कर्षे साध्यांतदलेन साध्याभाववतः साध्याभावव्यापकत्वविशिष्टसाधनाभावोपलक्षणात् तदन्यतरसंबंधेत्यर्थ(?)…र्थात् = २

साध्येति प्रतीकस्य च्युततया त्साध्यपदागर्भप्रतीकं अत एव व्याचष्टे साध्यनिष्ठेत्यादि = २

चिं॰टी॰ नव्यापकत्वंतथाचसाध्यनिष्ठसाधनव्यापकत्वावगाहित्वेसतिवीप्सावद्वाक्यत्वमन्वय्युदाहरणत्वमित्यर्थः।सा
२० ध्यसाधनाभावेति। द्वंद्वात्परः श्रूयमाणः शब्दः प्रत्येकमभिसंबध्यत इतिन्यायात्साध्याभावसाधनाभावेत्यर्थः व्युत्पत्त्या=
20 संबंधोव्यापकत्वंतथाचसाधनाभावनिष्ठसाध्याभावव्यापकत्वावगाहित्वेसतिवीप्सावद्वाक्यत्वंव्यतिरेक्युदाहर
णत्वमित्यर्थः। अत्रलक्षणद्वयेवीप्सावत्त्वविशेषणनिवेशात्नोपनयातिव्याप्तिः। प्राचीनमतमाह। न्यायेत्या
दि। न्यायावयवत्वेसतिप्रथमप्रदर्शितान्वितस्वार्थबोधकनामोत्तरप्रथमावयवत्वरूपदृष्टांतवचनत्वमुदाह
रणत्वमित्यर्थः। दूषयति। नेति। सामयिकत्वेनेति। मयासदृष्टांतमेवोदाहरणंप्रयोक्तव्यमित्यभिलापविशे
षनियंत्रितत्वेनेत्यर्थः। असार्वत्रिकत्वात्। सर्वत्रोदाहरणवाक्यघटकत्वाभावात्। ननुदृष्टांतशून्योदाहरण
वाक्यात्कथंव्यापकत्वबोधः। साध्यबोधकपदेनतथाबोधनेतस्यैवतात्पर्यग्राहकत्वादित्यतआह। योयोधू दृष्टांतस्यैव=
मवानित्यादि। इत्येव। इत्याकारकवाक्यादेव। व्याप्तिप्रतीतेः। व्यापकत्वप्रतीतेः। तथाचवीप्सायाएवतथातात्प राम॰
र्यग्राहकत्वादितिभावः। नापीत्यादि। ततत्साध्यकतत्पक्षकानुमितिजनकज्ञानविषयीभूतव्याप्तिबोधकत्वेस २०

एवकारेणदृष्टांतवाक्यव्यवच्छेदः=२

तिन्यायावयवत्वं तत्तत्पदृकतत्तत्साध्यकानुमितिप्रयोजकोदाहरणत्वमित्यर्थः। केषांचिन्मतमाह। अत्रेत्यादि।
उपनयाभिधानप्रयोजिकातज्जन्यबोधनिवर्त्त्यायाजिज्ञासापन्नः साध्यव्याप्यवान्नवेत्याकारा तज्जनकत्वे सति
न्यायावयवत्वमुदाहरणत्वमित्यर्थः सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह। एतदेवेति। उक्तलक्षणमेवेत्य
र्थः अन्वयेत्यादि। अन्वयव्याप्तिविषयकबोधजनकोपनयप्रयोजकजिज्ञासाजनकत्वे सति न्यायावयवत्वम
न्वयुदाहरणत्वं व्यतिरेकव्याप्तिबोधकोपनयप्रयोजकजिज्ञासाजनकत्वे सति न्यायावयवत्वं व्यतिरेक्युदाहरण
त्वमिति क्रमेण विशेषलक्षणद्वयमवगंतव्यमित्यर्थः। उदाहरणवाक्यान्न व्याप्तिः प्रतीयते तद्बोधकपदाभावा
त्। साध्यबोधकपदस्य व्यापकत्वविशिष्टे लक्षणाकल्पने गौरवात्। किंतु साध्यसाधनयोः सहचारमात्रं तस्मात्प्र
तीयते वीप्सितयत्पदद्वयेन च तद्व्यत्वतद्भिन्नत्वादिविरुद्धधर्माभ्यां तत्तदधिकरणबोधनात् तत्तदधिकरणमं
र्भा तर्भाव्यसहचारज्ञानं तत्तदधिकरणमंतर्भाव्यव्यभिचारशंकानिवर्त्तकमतो तद्बोधकवाक्यप्रयोगोऽयंमितरते
त्याचार्य्यमतमाह। अत्रेत्यादि। व्यभिचारवारणाय। तत्तदधिकरणमंतर्भाव्यव्यभिचारज्ञानवारणायवीप्सा। उ

चिं:टी:
२१
21

पदर्शितविरुद्धधर्माभ्यां तत्तदधिकरणबोधकं यत्सद्द्वयं। तथाच यो यो धूमवान् स वन्हिमानित्युदाहरणवाक्य
घटकीभूतयत्सद्द्वयोपस्थापिततत्तदधिकरणमंतर्भाव्य धूमवत्चत्वरं वन्हिमद्धूमवत्चत्वरभिन्नं च व
न्हिमदित्याकारकबोधएवोदाहरणवाक्याज्जायते न तु व्याप्तिबोधः। अन्वयव्याप्तेर्वानुमितिगमकतया व्य
तिरेकव्याप्तिबोधकोदाहरणप्रयोगेर्थांतरं स्यादिति भावः। आहुरित्यनेन सूचितमस्वरसमाह। यत्र चेत्या
दि। चत्वर्थः। सामानाधिकरण्यादेवेति। साध्यहेत्वोः सहचारमात्रादेवेत्यर्थः। व्याप्तिः व्यभिचाराभावः। नवीप्से
ति। वीप्साव्यर्थास्यादित्यर्थः। यथेत्यादि। इदं प्रमेयं गगनत्वात् इदं द्रव्याभिन्नं गगनत्वादित्यादावित्यर्थः। अ
त्रैकस्यैवाधिकरणस्य हेत्वधिकरणतया विरुद्धधर्माभ्यां हेत्वधिकरणोपस्थापनासंभवेन तदुपस्थापक
वीप्साव्यर्थास्यादाचार्यमतेऽस्माकं तु गमकतौपयिकहेतुव्यापकत्वबोधतात्पर्यग्राहकत्वेनैव सार्थक
त्वमिति भावः। दूषणांतरमप्याह। वीप्सायामपीति। वीप्सितयत्सदाभ्यां विरुद्धतत्तद्धर्माभ्यां तत्तदधिकरणो एम०
पस्थापनेपीत्यर्थः। व्यभिचारतादवस्थ्यमिति। व्यभिचारज्ञानसंभवादित्यर्थः तथाच ग्राह्याभावावगाहि २१

तथाचैकविधमेवोदाहरणमिति भावः ॥

ग्रहस्यैवविशिष्टबोधविरोधितयोदाहरणवाक्यात्। धूमवत्त्चत्वरंवह्निमत्धूमवत्चत्वरभिन्नंवह्निमदिति
बोधोदयेपिव्यभिचारज्ञानोत्पत्तौबाधकाभावात्। कथंव्यभिचारज्ञाननिवर्त्तकबोधोपयिकत्वंवीप्साया इ
तिभावः। ननुयदिवीप्सायास्तथाविधव्यापकत्वबोधेतात्पर्यग्राहकत्वंतदातत्पदेवीप्साअनुचिता किंतु
प्रथमयत्पदस्यसाकांक्षत्वसंपत्त्यर्थमेकएवतत्पदप्रयोगउचितः। मन्मतेतुतत्राप्यवश्यंवीप्सा। अन्यथा
विरुद्धाभ्यांधर्माभ्यामुपस्थितानांतत्तत्पदधिकरणानांएकेनतत्पदेनोपस्थापनासंभवात्। सकृदुच्चा
रितेत्यादिव्युत्पत्तेरित्यतस्तत्रैवोपपत्तिमाह। वीप्साचेति। त्वन्मतेपितत्रवीप्सेत्याह। विरूपोपस्थितयो
रपीति। विरुद्धधर्माभ्यामुपस्थितानामधिकरणानामित्यर्थः। तत्पदेनेति। एकेनतत्पदेनेत्यर्थः। परामर्
शादुपस्थितिसंभवात्। ननुसकृदुच्चरितेत्यादिव्युत्पत्तिभंगःस्यादतआह। बुद्धिस्थेत्यादि। तदादिसर्वना
मपदस्येत्यादि। नव्युत्पत्तिविरोधइति। नसकृदुच्चरितेत्यादिव्युत्पत्तिविरोधइत्यर्थः। तथाविधव्युत्पत्तेरेत
दतिरिक्तस्थलत्वादितिभावः। तत्पदेवीप्साभावेसाधकमाह॥ यद्येत्यादि। ननुवीप्सायदितत्पदे तदाक

स्त्ववीक्षिततत्पदसमभिव्याहृतात्याद्यिपदे हेतुव्यापकत्वतात्पर्यग्राहकसमाजस्यप्रकृतेपिसत्वात्कुतोनव्यापकत्वबोध
इत्याशंक्याचीक्षिततत्पदस्यतादृशसमाजांतःपातिनोभावान्नतथाप्रतीतिरित्याह=६

यंसंचारिणीदीपशिखेवरात्रौयंयंव्यतीयायपतिंवरासानरेन्द्रमार्गाट्टइवप्रपेदेविवर्णभावंससभूमिपाल
इत्यत्रतत्पदेवीप्साऽसंगतिरितिचेत्न।यत्तस्तत्पदेनवीप्साइतिनसामान्यनियमः। किंतुवीक्षितयत्पदसमभि
व्याहारेणसमभिव्याहृतपदार्थतावच्छेदकव्यापकत्वंयत्रबोध्यतेतत्रनतत्पदेवीप्साइतिनियमः। यंयंव्यती
यायेत्यादौतुवीक्षितयत्पदसमभिव्याहारेणयत्पदसमभिव्याहृतपदार्थतावच्छेदकमहीपालत्वव्यापकत्वं
नबोध्यतेकिंतुमहीपालवृत्तितत्तद्धर्मतत्तद्धर्माश्रयभिन्नत्वधर्माभ्यांकेवलमहीपालाएवयत्पदाभ्यांबो
ध्यंतेप्रयोगानुसारित्वात्। कल्पनायाइतिनानुपपत्तिगंधोपीतिध्येयं। आभासीभूतोदाहरणमाह। इदंचे
ति।उदाहरणमित्यर्थः। साध्यसाधनोभयाश्रयेत्यादि। साध्यसाधनोभयमेवाश्रयोनिरूपकंयस्याइतिव्यु
त्पत्त्यासाध्यसाधनोभयाश्रयपदंसाध्यसाधनोभयनिरूपितव्याप्तिपरं। तथाचधूमवान्वन्हेरित्या
दौसाध्यसाधनोभयव्याप्तिविकलत्वात्योयोधूमवान्सवन्हिमानित्युदाहरणमाभासरूपमित्यर्थः। अ
नुपदर्शितान्वयेति। विपरीतक्रमेणोपदर्शितोऽन्वयोऽन्वयव्याप्तिर्येनेतिव्युत्पत्त्याऽनुपदर्शितान्वय

यत्पदार्थकत्वे त्यादि=३

समभिव्याहारेणयत्पद=५

एम० २२

अयंभावः।व्यभिचारशंकानिवृत्त्यर्थमुदाहरणवाक्यघटकवन्हिपदलक्षणायाआवश्यकतयावीक्षिततत्पददृष्टांतानां
तात्पर्यग्राहकत्वकल्पनाद्यघ्यतापमित्यादौव्यापकत्वबोधअन्यत्रतात्पर्यग्राहकत्वकल्पनेगौरवायतत्पदानामर्थविवक्षेति
ध्येयम्५=५

पदं तथाविधव्याप्तिकपरं। तथा चेदं वाच्यं ज्ञेयत्वादित्यादौ यो यो वाच्यत्वाभाववान् स ज्ञेयत्वाभाववानित्युदाहर
णमनुपदर्शितान्वयव्याप्तिकत्वादाभासरूपमित्यर्थः। विपरीतोपदर्शितान्वयेति। विपरीतक्रमेणोपदर्शितो
ऽन्वयोऽन्वयव्याप्तिर्येनेति व्युत्पत्त्या विपरीतोपदर्शितान्वयपदं तथाविधव्याप्तिकपरम्॥ तथा च पर्वतो वह्नि
मान् धूमादित्यादौ यो यो वह्निमान् स धूमवानित्युदाहरणं विपरीतक्रमेणउपदर्शितव्याप्तिकत्वादाभास
रूपमित्यर्थः। अनुपदर्शितव्यतिरेकेति। अनुपदर्शितो व्यतिरेको व्यतिरेकव्याप्तिर्येनेति व्युत्पत्त्याऽनुप
दर्शितव्यतिरेकपदं अनुपदर्शितव्यतिरेकव्याप्तिकपरं। तथा चायमेतद्घटाभिन्नः एतत्घटत्वादित्या
दौ यो य एतत्घटत्ववान् स एतत्घटाभिन्नत्ववानित्युदाहरणमनुपदर्शितव्यतिरेकव्याप्तिकत्वादा
भासरूपमित्यर्थः। विपरीतोपदर्शितव्यतिरेकेति। विपरीतक्रमेणउपदर्शितो व्यतिरेको व्यतिरेकव्याप्ति
र्येनेति व्युत्पत्त्या विपरीतोपदर्शितव्यतिरेकपदं तथाविधव्यतिरेकव्याप्तिकपरं। तथा चायमेतत्घटा
भिन्नः एतत्घटत्वादित्यादौ यो यः एतत्घटत्वाभाववान् स एतत्घटभिन्नत्ववानित्युदाहरणं विपरी

तोपदर्शितव्यतिरेकव्याप्तिकत्वादाभासरूपमित्यर्थः। एतदुदाहरणानामाभासताप्रयोजकं प्रकृतसाध्यसि
द्ध्यौपयिकव्याप्तिप्रमानुपधायकत्वमवगंतव्यं। उदाहरणानंतरमिति। उदाहरणप्रयोगानंतरमित्यर्थः।
अन्वयस्थलीयोपनयप्रयोगार्थकोपनयइत्यनेन। व्याप्तिमित्यादि। पक्षः साध्यव्याप्यप्रकृतहेतुमान्न वेत्याकां
क्षायामित्यर्थः। तत्रेति। लक्षणेनोपनयनिरूपणेकर्त्तव्ये इत्यर्थः। अनुमितीत्यादि। अत्रजनकांतं प्रकृतसा
ध्यानुमित्यौपयिकव्याप्तिविशिष्टप्रकृतहेतुप्रकारकपक्षविशेष्यकशाब्दबोधजनकपरं। तथा च तथाविधशा
ब्दबोधजनकत्वे सति न्यायावयवत्वमुपनयत्वमित्यर्थः। प्रत्येकव्याहृतिस्तु स्पष्टैव। सामान्यलक्षणमभिधा
यविशेषलक्षणमाह। साध्येव्याप्येत्यादि। साध्यनिरूपितव्याप्तिविशिष्टप्रकारकपक्षविशेष्यकशाब्दबोध
जनकत्वे सति न्यायावयवत्वमन्वय्युपनयत्वं साध्याभावव्यापकाभावप्रतियोगित्वविशिष्टप्रकारकपक्षवि
शेष्यकबोधजनकत्वे सति न्यायावयवत्वं व्यतिरेक्युपनयत्वमिति विशेषलक्षणद्वयमित्यर्थः। उदाहरणां एम.
तावयवादिमतं निराकरोति। उदाहरणं तथैवेत्यादि। तृतीयलिंगपरामर्शस्येति। प्रकृतसाध्यानुमित्यौप

यिकज्ञानस्येत्यर्थः। अवयवांतरादिति। उपनयभिन्नावयवांतरादित्यर्थः। तथा च प्रकृतसाध्यानुमित्यौपयिक
व्याप्तिविशिष्टपक्षधर्मताज्ञानसंपत्त्यर्थं उपनयप्रयोग आवश्यक इति भावः। ननु मीमांसकमते विशिष्टपरामर्श
स्यानुमित्यजनकतया तल्लाभेपि क्षतिविरह इत्यत आह। तदनभ्युपगमेपीति। तथाविधव्याप्तिविशिष्टपराम
र्शस्यानुमित्यजनकत्वेपीत्यर्थः। पक्षधर्मताया अभावात्। व्यापकतावच्छेदकरूपेण पक्षधर्मताज्ञानस्यानुमि
त्यौपयिकस्य उपनयं विना असंभवात्। तथा च परैरपि तथाविधज्ञानस्यानुमितिजनकताभ्युपगमेन तत्सं
पत्त्यर्थमुपनयप्रयोग आवश्यक इति भावः। ननु हेत्ववयवादेव तल्लाभो भविष्यति किमुपनयेनेत्यत आह। न
चेत्यादि। हेतुवचनात्। हेत्ववयवात्। तदवगमः। तथाविधिपक्षधर्मतावगमः। तस्येति। हेत्ववयवस्येत्यर्थः।
कोत्र हेतुरित्याकांक्षायां कुत इत्याकांक्षायां। प्रवृत्तत्वेन प्रयुक्तत्वेन। हेतुत्वरूपेत्यादि। लिंगनिरूपितहेतुत्व
बोधकस्येत्यर्थः। अतत्परत्वात्। उपदर्शितपक्षधर्मत्वाबोधकत्वात्। शंकते। वादिवाक्यादिवेत्यादि। वादिवा
क्यात्। हेत्ववयवात्। पक्षे लिंगज्ञानज्ञाप्यसाध्यवत्त्वप्रतीताविति शेषः। आक्षेप इति। योयज्ज्ञाप्यसाध्य

चिं॰टी॰
२४
25

वान् सत्तद्वानितियन्नत्घटितसामान्यमुखव्याप्तिज्ञानात् हेतौपक्षवृत्तित्वानुमितिरित्यर्थः। तथा चानुमा
नादेवपक्षवृत्तित्वायालाभे किंतद्बोधकोपनयेनेतिभावः। तदर्थस्येति। हेत्ववयवांतार्थस्य धूमज्ञानज्ञाप्यव त्यर्थः=
न्हिमत्त इत्यर्थः। असिद्धत्वेन गृहीतप्रामाण्यकनिर्णयाविषयत्वेन। अनाक्षेपकत्वात्। तथाविधानुमित्य
जनकत्वात्। तथा च हेत्ववयवांतार्थनिर्णये प्रामाण्यनिर्णयाभावेनानुमितिं प्रति गृहीतप्रामाण्यकलिं
गनिर्णयस्य हेतोरभावेन तथाविधानुमित्यसंभवादिति भावः। अन्यथेति। अगृहीतप्रामाण्यकलिंगनि
र्णयस्याप्यनुमितिहेतुत्वे इत्यर्थः। प्रतिज्ञामात्रादेवेति। प्रतिज्ञाजन्यबोधविषयसाध्यवत्वादेवेत्यर्थः। स
र्वाक्षेपेति। साध्यज्ञापकहेतुमत्त्वादिलाभसंभव इत्यर्थः। अवयवांतरविलयात्। हेत्ववयवादेरपिव्यर्थत्व
प्रसंगात्। अनुमानादेव हेत्ववयवप्रतिपाद्यबोधसंभवादित्यर्थः। ननु वादिन उपनयवाक्याभावेऽपि प्रतिज्ञा
हेत्ववयवाभ्यां साध्यवत्पक्षहेतोरुपस्थितौ यतो हेतुमानित्याकारकोपनीतभानस्य हेतौ पक्षवृत्तित्वावगा एम॰
हिनः। प्रतिवादिनि संभवात्। वादिन उपनयप्रयोगो निरर्थक इत्याशंकते। प्रतिपाद्यानामिति। प्रतिवादि २४

यु=

व

नामित्यर्थः। स्वतस्य वाधुच्चरितोपनयवाक्यं विनैव। तदागमः। हेतोपक्षवृत्तित्वावगमः। येन रूपेणायत् यत्र
ज्ञातं तेन रूपेणैव तत्र तदुपनय इति मते पक्षेऽज्ञातहेतुकस्य पुरुषस्य तथा बोधासंभवात्। तद्बोधार्थं वा
दिना उपनयवाक्यप्रयोगस्यावश्यक इत्याशयेन समाधत्ते। नेत्यादिते षां। प्रतिवादिनां व्युत्पन्नाव्युत्पन्नतया।
पक्षे हेतुमत्ताज्ञानतदभाववत्तया। सर्वत्र तदसंभवात्। यस्य प्रतिवादिनः पक्षे प्रथमं हेतुमत्ताज्ञानं नास्ति त
स्य तथाविधोपनीतभानासंभवात् तथा च तस्य हेतोपक्षवृत्तित्वज्ञानासंभवात्। उपनयप्रयोगस्यावश्य
क इति भावः। यद्युपनीतभानं प्रत्युपनायज्ञानकमात्रहेतुः न तु तत्तदधिकरणमंतर्भाव्य तत् ज्ञानं गौर
वादिमते पि उपनयस्यावश्यकत्वमाह। प्रतिपादकेनेति। प्रतिपादकेन। वादिना। स्वव्यापारस्य निर्वाहे पि तं तु
पक्षः साध्यव्याप्यवान् इत्याकारकाकांक्षानिवर्त्तकस्वकीयवाक्यस्य संपादयितुं। तथा च तथाविधाकांक्षा पक्षः साध्यव्याप्यवा न्चेत्याकांक्षा=२
विनिवृत्त्यर्थं उपनयप्रयोगः आवश्यक इति भावः। अन्यथेति। आकांक्षानिवर्त्तकवाक्यस्य वादिनानभि
धान इत्यर्थः। अवयवांतरे पि। हेत्ववयवादावपि। एवं स्यात्। अभिधानप्रसंगः स्यात्। तथा च तत्र यथाकां

चि॰टी॰ ६प्रकारकांतं। तत्रापि विशिष्टांतं धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामतिव्याप्ति
वारणाय ६
२५ त्तानिवृत्त्यर्थः प्रयोगः तथा प्रकृतेपीति भावः। निगमनमिति। प्रयुज्यत इति शेषः। तच्चेति। निगमनं चेत्यर्थः
25 ।अनुमितीत्यादि। अत्र कारणांतं प्रकृतन्यायावयवार्थकं। व्याप्तिविशिष्टपक्षधर्मताधीप्रयुक्तत्वं च व्या
प्तिविशिष्टपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानज्ञाप्यत्वप्रकारकत्वं। तथा च प्रकृतन्यायावयवत्वे स
ति व्याप्तिविशिष्टप्रकृतपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानज्ञाप्यत्वप्रकारकसाध्यज्ञानजनकवाक्य
त्वमित्यर्थः। निगमनवाक्यघटकीभूततस्मादित्यंशार्थव्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतुज्ञानज्ञा
प्यत्वप्रकारकसाध्यविषयकज्ञानजनकवाक्यत्वात्तत्र लक्षणसमन्वयः। प्रतिज्ञादावतिव्याप्तिवारणा
य। वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वविशिष्टधूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायाम
तिव्याप्तिवारणाय पक्षे प्रकृतेति पक्षतावच्छेदकावच्छिन्नार्थकं। पर्वतो वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वविशि
ष्टधूमाद्वह्निमान् धूमादित्यादौ प्रतिज्ञायामतिव्याप्तिवारणाय प्रकृतसाध्येति। न चैवं सत्यपि तत्रातिव्याप्तिर्दु राम॰
र्वारैवेति वाच्यं। तथाविधज्ञानज्ञाप्यत्वनिष्ठप्रकारतानिरूपितसाध्यतावच्छेदकावच्छिन्नविषयतायाः लक्ष २५

तादृशज्ञानज्ञाप्यत्वघटितसाध्यतावच्छेदकावच्छिन्न
साध्यबोधकत्वादिति भावः॥

णेनिवेशादिति।निगमनेनेनेरर्थक्यमाशंकते।नचेति।पर्याप्तेरिति।लाभादित्यर्थः।तेनेति।निगमनेनेत्यर्थः।अप
र्यवसानादिति।अनुमितिसामग्र्यसंपादकत्वात्।अभिधानाभिधेययोरिति।अनुमित्यौपयिकार्थबोधकशब्द
तत्प्रतिपाद्ययोरित्यर्थः।पर्यवसानेनेति।पूर्णत्वेनेत्यर्थः।अवयवांतराणामिति।निगमनानामित्यर्थः।साध्यभे
देननिगमनानामनंतत्वात्वहुवचनं।ननुनिगमनानंगीकारेपक्षःसाध्याभाववान्नवेत्याकारकसंशयनिवृत्तिः
कथंभविष्यतीत्यतआह।विपरीतशंकेत्यादि।पक्षःसाध्याभाववान्नवेत्याकारकविपरीतशंकानिवृत्तिरित्यर्थः
।ततएवाभावात्।व्याप्तिविशिष्टपक्षधर्मताविशिष्टलिंगप्रतिपादकादेवसंभवात्इत्यर्थः।अन्यथेति।त
थाविधलिंगप्रतिपादनात्तथाविधशंकानिवृत्त्यनंगीकारेइत्यर्थः।तद्वारणात्।तथाविधशंकानिवृत्त्यसंभ
वात्।तत्रसाध्याभावादिबोधकपदाभावेतस्मात्साध्याभावादिमत्त्वाज्ञानासंभवादितिभावः।ननुनिगमनज
न्ययथाकथंचिद्बोधएवतथाविधशंकानिवर्त्तकोभविष्यतीत्यतआह।नहीति।तत्निगमनं।विशेषदर्शन
वत्।पक्षेसाध्याभावादिमत्त्वाज्ञानं।अनाहत्यैव।अनासाद्यैव।तन्निवर्त्तकम्।तथाविधशंकानिवर्तकवोध
संशयकोटीद्वयोरन्यतरांशेसध्यमितावच्छेदकनिर्णयस्यैवसंश
यविरोधित्वोनिगमनंनतद्बोधकमित्याह=२

चिं०टी०अ०
२६
26

जनकं।तथाचसाध्याभावाद्यविषयकतज्ज्ञानस्यबोधस्यतत्रप्रतिबंधकत्वेमानाभावदितिभावः। शंकते।सिद्ध
निर्देशतयेति।सिद्धत्वविशिष्टसाध्यबोधकतयेत्यर्थः।निगमनांतरइतिशेषः।वारयतीति।तथाविधशंकाप्र
तिबंधकंभवतीत्यर्थः।तथाविधप्रतिवध्यप्रतिबंधकभावस्तुअनुभवबलादास्थेयइतिभावः।सिद्धत्वमत्रप्रमा
णसिद्धत्वंहेतुविभक्तिसाकांक्षत्वरूपसाध्यत्वाभाववत्वंवातत्राद्येदोषमाह।स्वरूपमात्रेत्यादि।वन्हिपदेनव
न्हिस्वरूपमात्रबोधनादित्यर्थः।तथाचात्रतथाविधसिद्धत्वबोधकपदाभावेनतथावक्तुमशक्यत्वादितिभा
वः।द्वितीयेदूषणमाह।साध्यत्वाउपस्थिताविति।वन्ह्यादिपदेहेतुविभक्तिसाकांक्षत्वरूपसाध्यत्वस्याभावे
नतदुपस्थितावित्यर्थः।तस्मादित्यादि।आकांक्षाज्ञानाभावेनवन्ह्यादेस्तस्मादितिहेतुविभक्त्यर्थस्यान्वयप्र
संगादित्यर्थः।शाब्दबोधसामान्यंप्रत्याकांक्षाज्ञानस्यहेतुत्वादितिभावः।इदमुपलक्षणं।तथाविधार्थबोधक
पदाभावेनतादृशबोधासंभवोपिद्रष्टव्यः।वस्तुतस्तु।तथाविधसंदेहंप्रतितादृशसिद्धत्वज्ञानप्रतिबंधकत्व रम०
स्यानुभवकलहग्रस्ततयानकिंचिदेतदित्यवधेयं।निगमनस्यनैरर्थक्यरूपपूर्वपक्षोपरिसमाधत्ते।नेत्यादिना २६

दभावबोधनेऽवयवांतरे तद्बाधसत्त्वेऽपि पक्षे तत्त्वाभावबोधने। समीहितानन्वयात् अवयवांतरात् साध्यसि
द्ध्युपयुक्तान्वयबोधासंभवादित्यर्थः। तथा च बाधितत्वादिबोधसंपत्त्यर्थं निगमनानुसरणमावश्यकमिति भा
वः। तद्बोधस्येति। बाधाभावादिज्ञानस्येत्यर्थः। अथान्वयव्यतिरेकानुविधानमेवमानमित्यत आह। असिद्धि
श्चेति। तथाविधान्वयव्यतिरेकानुविधानस्यासिद्धेरित्यर्थः। यज्ज्ञाने सतीत्यादि। तथा च तादृशव्याप्तिज्ञानस्ये
वानुमितिं प्रत्यबाधितत्वादिज्ञानस्य जनकत्वमानत्वमिति भावः ननु निगमनात् हेतावबाधितत्वादिबोधो न सा
ध्यात् तत्र तद्बोधकपदाभावात्। किंतु निगमनबोधितव्याप्तिविशिष्टपक्षवृत्तित्वहेतुकानुमानात्। तन्नु न संभ
वति निगमनात्तथाविधपक्षवृत्तित्वबोधासंभवात्। न च निगमनघटकीभूततस्मादित्युपस्थापितव्याप्तिवि
शिष्टपक्षवृत्तित्वविशिष्टहेतुज्ञानज्ञाप्यत्वबोधात्। तद्घटकत्वेन तथाविधपक्षवृत्तित्वबोधोपि संभवतीति
वाच्यम्। पूर्वान्वितहेतुविभक्त्यर्थस्य पुनरन्वये आकांक्षाविरहेण तदसंभवात्। तथा च निगमनात् कथम
बाधितत्वादिबोध इत्याशयेनाह। नवानन्वय इति च निगमनादबाधितत्वादिबोधासंभव इत्यर्थः। समाधत्ते। त

चिं॰टी॰
२७
27

स्मादित्यादिहेतुविभक्त्यर्थस्यान्वयवोधोत्तरमित्यर्थः। व्याप्तिविशिष्टपक्षवृत्तित्वविशिष्टहेतुज्ञानज्ञाप्यत्वरू
पहेतुनेतिशेषः। हेत्वनाकाङ्क्षितेत्यादि। हेतुविभक्त्यर्थान्वयप्रयोजकीभूताकांक्षाभाववत्त्वलक्षणंयत्सिद्ध
त्वं तथाविधाकांक्षाविरोधितज्ज्ञानादित्यर्थः। न तु तज्ज्ञानात्पूर्वम्। तथाविधविभक्त्यर्थान्वयात्पूर्वम्। तथा
विधविरोधिज्ञानमिति। विभक्तिविपरिणामेनान्वयः। तथा च हेतुविभक्त्यर्थस्यान्वये आकांक्षाविरहेपि निगम
नजन्यवोधपूर्वमप्रमात्मकतथाविधाकांक्षाज्ञानसंभवेन निगमनात्तथाविधपक्षवृत्तित्वविशिष्टहेतुवोधनि
र्वाहेण तदुत्तरं तथाविधपक्षवृत्तिरूपहेतुनाऽवाधितत्वादिवोधोत्पत्तौ वाधकाभावान्नानुपपत्तिर्लेशोपीतिभा ले
वः। ननु तथाविधपक्षवृत्तित्वरूपहेतुनैव चेदवाधितत्वादिवोधस्तदा निगमनं व्यर्थमुपनयादपि तथाविधप
क्षवृत्तित्वोपस्थितेरिति चेन्न। यतो निगमनेज्ञात एकवारं प्रतिपादितहेतुज्ञानज्ञाप्यत्वस्य पुनः प्रतिपाद
ने किं प्रयोजनमित्याकांक्षाकल्पितावाधितत्वादिवोधप्रयोजनकत्वान्यथानुपपत्तिरूपानुकूलतर्केण त राम॰
थाविधपक्षवृत्तित्वेऽवाधितत्वादिव्याप्तिनिर्णयसंभवेन निगमनोत्तरमेवावाधितत्वादिवोधः संभवतीति न तु २७

पनयोन्तरं तदा तथाविधव्याप्तिग्रहकानुकूलतर्कविरहादिति तथाविधबोधसंपत्त्यर्थं निगमनप्रयोगश्चा
वश्यक इति। केचित्तु। तथाविधप्रयोजनकत्वान्यथानुपपत्त्या निगमनघटकीभूततत्पदस्यैवाबाधितत्वा
दिलक्षणया तथाविधबोधः संभवतीति वदंति। प्राचीनमतसिद्धं तस्मात्तथा चायमिति निगमनं प्रयोगं दूष
यितुं तन्मतं दर्शयति। इह केचिदिति। पूर्वोक्ताशेषेति। व्याप्तिविशिष्टपक्षवृत्तित्वेत्यर्थः। सिद्धस्थल इवेति।
मैत्रः पचति अयमपि तथेति लोकप्रसिद्धस्थल इवेत्यर्थः विरोधवारणायेति। पक्षतावच्छेदकावच्छिन्नप
क्षे साध्यवत्ताबोधप्रयुक्तो य उपक्रांतप्रतिज्ञावाक्येन सहोपसंहृतनिगमनवाक्यस्यान्यूनार्थबोधजनक
त्वरूपविरोधस्तद्वारणायेत्यर्थः युक्त इति। अत्र परामर्शस्यानुषंगेन तत्रान्वयः। तथा च तस्मात् वह्निमा
निति निगमनप्रयोगस्तदा निगमनवाक्यात् पक्षतावच्छेदकावच्छिन्नेवह्नेरलाभादुपक्रमोपसंहारयो
र्विरोधः स्यात्तस्मात्तथायमिति निगमनप्रयोगे तु न तथा विरोध इति तथैव निगमनप्रयोग उचित इति भावः
। तथेत्यादि निगमनघटकीभूततथाशब्दस्य अव्यवहितपूर्वोत्पन्नबुद्धिविशेष्यस्वरूपं चार्थः। अव्यवहि

चिं॰टी॰
२८
५८

तत्पूर्ववुद्धिविशेष्यत्वे सति प्रकारे वार्थः। अव्यवहितपूर्ववुद्धिविशेष्यस्यादर्शनं वार्थ इत्यर्थः। तथा चायमि
त्यादि। तथा चायमित्युपनयजन्यवुद्धौ हेतुमत्तत्त्ववविशेष्यत्वादित्यर्थः। तथेत्यादि। तथेति शब्दादपि हेतु
मत्पक्षसंसर्गवोपस्थितिः स्यादित्यर्थः। अनन्वय इति। तथापदोपस्थापिततथाविधहेतुमति तस्यात्पदोप
स्थापिततथाविधहेतुमत्पक्षज्ञानज्ञाप्यत्वस्यान्वयासंभव इत्यर्थः। अभेदेन ज्ञाप्यज्ञापकभावस्यानु
त्पन्नत्वादिति भावः। ननु अनुभवानुरोधात्तथाव्युत्पत्तिः कल्प्यते तथा च तथाविधबोधे वाधकाभाव इ
त्यत आह। नहीति। हेतुमत्त्वादिवेत्यादि। हेतुमत्ज्ञानज्ञाप्यो हेतुमानित्यन्वयबोधोऽनुभवसिद्ध इत्यर्थः।
तथा च तथाविधबोधेऽनुभवाभावे तथाव्युत्पत्तिकल्पनमावश्यकमिति भावः। सामान्येनेति। साधनाधि
करणत्वादिनेत्यर्थः। पक्षस्यापीति। उपनयजन्यबोधविशेष्यस्यापीत्यर्थः। अन्वयव्याप्तिप्रवेशादिति।।
अन्वयव्याप्तिघटकत्वेन प्रकारत्वेन तत्र भानादित्यर्थः। तत्प्रकारान्वय इति।। निगमनजन्यबोधप्रका राम॰
रीभूतस्य तस्मादित्यर्थे हेतुमत्ज्ञानज्ञाप्यत्वस्यान्वस्यान्वय इत्यर्थः। तत्रैवेति। उपनयजन्यबोधविशेष्यी २८

भूतहेतुमत्तिपक्षेवेत्यर्थः।वाच्यस्तत्तुनसंभवतीतिशेषः।अनन्वयादिति।उपदर्शितवस्तुत्वात्तथावि
धान्वयबोधासंभवादित्यर्थः।अतएवेति।वक्ष्यमाणदोषादेवेत्यर्थः।अभेदानुमानेचेत्यादिचकारः
केवलान्वयिनीत्यनंतरंयोज्यः।तस्मान्नथेत्यादि।तस्मान्नथेतिनिगमनघटकीभूततथाशब्दार्थस्सा
दृश्यस्यान्वयासंभवादित्यर्थः।तथाचपर्वतःपर्वतभिन्नःपर्वतत्वादित्यादौपर्वतसादृश्येपर्वतत्वव्या
प्यत्वाभावेनतत्ज्ञाप्यत्वाभावात्पर्वतत्ववज्ज्ञाप्यत्वस्यएवंप्रमेयंवन्हिमत्धूमादित्यादौभेदघटि
तपक्षसादृश्यस्याप्रसिद्ध्यातत्स्थलीयतस्मान्नथेतिनिगमनवाक्यादन्वयबोधासंभवादितिभावः।
ननुतथापदंबुद्धिस्थत्वेनबुद्धिस्थंबोधयिष्यतीतितत्रैवतस्मादित्यस्यान्वयोभविष्यतीत्यतआह।
बहूनांचेति।प्रक्रमेबुद्धिस्थत्वेविशिष्यानन्वयात्।साध्यएवतस्मादित्यर्थस्यान्वयबोधासंभवादि
त्यर्थः।अन्यत्रापि।तथाविधान्वयबोधसंभवेनोपक्रमोपसंहारविरोधोदुःपरिहारएवेतिभावः।नन्व
त्रहेतुज्ञानज्ञाप्यत्वबाधान्नतथान्वयबोधे।नभविष्यतीत्यतआह।वादिवाक्येचेति।निगमनघट

कतयापदार्थबुद्धिस्थेचेत्यर्थः। योग्यतयेत्यादि। बाधाभाववलात् तस्मादित्यर्थस्यान्वयांगीकारे इत्य
र्थः। अतिप्रसंगादिति। धूमसंयोगादेरपिबुद्धिस्थतया तत्रापिबाधाभावेन पर्वतोवन्हिमान् धूमादि
त्यत्रोपनिगमनस्य तस्मात्पदार्थस्यान्वयबोधप्रसंगादित्यर्थः। तथाचोपक्रमोपसंहारविरोधोदुःप
रिहर इतिभावः। ननु तच्छब्दस्यबुद्धिस्थवाचकतयाबुद्धिस्यहेत्वतिरिक्तज्ञानज्ञाप्यत्वस्यापितस्मादि
त्यनेनबोधसंभवात्। भवन्मतेपिकथं तस्मादित्यनेन हेतुज्ञानज्ञाप्यत्वस्यैवान्वय इत्यत आह। तस्मा
(त्य) दित्येत्यादि तस्मादिति पदघटकीभूतविभक्त्यर्थज्ञानज्ञाप्यत्वैकदेशे ज्ञानेहेत्वतिरिक्तस्यबाधात्।।
अन्वयासंभवादेव तस्मादित्यस्य हेतुज्ञानज्ञाप्यत्वबोधकत्वनियम इत्यर्थः। प्राचीननयेसाध्यतावच्छे
दकावच्छिन्नसाध्येहेतुज्ञानज्ञाप्यत्वस्य तथाविधनिगमनवाक्यात् बोधासंभवेन निगमनानंतरं तथा
विधहेतुनाहेतुविभक्त्यर्थान्वयनिराकांक्षत्वबोधोप्यनुपपन्न इत्यभिप्रायेण स्वमते तदुपपादकमा एमं॰
ह। तस्मादग्निरित्यादि। विशिष्यसिद्धता। साध्यतावच्छेदकावच्छिन्नेहेतुविभक्त्यर्थान्वयनिरा २९

कांक्षता। साध्यतया उक्तस्य हेतुज्ञानज्ञाप्यत्वेन बोधितस्य। समर्थहेतुसंबंधेन। व्याप्तिविशिष्टपक्षवृ
त्तित्वविशिष्टहेतुज्ञानज्ञाप्यत्वेन। पुनरुत्कीर्त्तनात्। पुनर्बोधनात्। तथाच वह्निहेतुविभक्त्यर्थान्व
यनिराकांक्षः। हेतुविभक्त्यर्थबोधोत्तरबोधप्रकारीभूतहेतुविभक्त्यर्थवत्त्वादित्यनुमानान्निगमना
नंतरं निराकांक्षत्वबोधो मन्मते संभवति। भवन्मते तु साध्यतावच्छेदकावच्छिन्ने पक्षे तथाविधहेतुज्ञा
नाभावान्निगमनोत्तरं तथाविधानुमित्यात्मकनिराकांक्षत्वबोधोपि दुर्लभ इति भावः। ननु प्रकारां
तरेणैव तत्र निराकांक्षत्वबोधो भविष्यतीत्यत आह। अन्यथेति। निगमनानंतरमनुमानात्तथा
विधबोधानंगीकारे इत्यर्थः। तद्वैयर्थ्यादिति। निगमनस्य वैयर्थ्यप्रसंगादित्यर्थः। अबाधितत्वादि
तिबोधस्यापि प्रकारांतरेण संभवात् तदुक्त्यर्थं निगमनस्वीकारो निरर्थक इति भावः। ननु साध्यसंशय
प्रयोजनहेत्वाकांक्षादीनामपि अवयवत्वात्तेषां पंचविधत्वोक्तिः पुनरुचितेत्यत आह। संशयेत्यादि
प्रयोजनं। तत्त्वनिर्णयेच्छा अवयवलक्षणाभावात्। वाक्यत्वघटितावयवलक्षणाभावात्। नावयवाः। न

चिं-टी:-अ: ३०

न्यायावयवाः न्यायांगत्वेनेति। न्यायसंपादकत्वेनेत्यर्थः। उपयुज्यंते। अपेक्ष्यंते। नाधिक्यमिति। नाव
यवाधिक्यप्रसंग इत्यर्थः। कंटकोद्धारस्येति। को वन्हिमान् कुतो वन्हिमान् कथमस्य गमकत्वमिति
प्रश्नसमूहस्येत्यर्थः। न सार्वत्रिकत्वमिति। न सर्वत्र न्यायसंपादकत्वमित्यर्थः। समयविशेषोपयोगि
त्वादिति। कादाचित्कत्वादित्यर्थः। यत्र प्रकारांतरेण प्रतिवादिनस्तथाविधाकांक्षां बुध्वा वादिना न्याय
प्रयुक्तस्तत्र तथाविधप्रश्नस्याभावादिति भावः॥ ॥ इत्यनुमानरहस्ये अवयवग्रंथरहस्यम्॥ ॥ किं
चिदत्र विरुद्धं चेदुक्तं दैववशान्मया। क्षांतैः पुरुषधर्मत्वात्तत् क्षंतव्यं मनीषिभिः॥ १॥ अगहनवदी